मनुमीयते॥कर्णकण्डुयने कर्णान्ताधस्तात्तुर्व्यं॥सुवर्णविद्रुम भवेत्॥गलस्पर्शे नतनतः प्रमाणाधः करोटिका॥लोहभंखलावा मार्ज्जारकङ्कालं
वा त्रिकरोधरे॥अंशस्पर्शेन त्प्रमाणाधरे नदाभरणं॥कक्षस्पर्शे कक्षान्ताधो लोहं वाङ्ग पीडने करोष्ठ प्रमान नतः॥दक्षिणाकरस्पर्शे कटिमात्राधः
पृष्ठकपालं मृन्मयकपालं वा॥वामहस्तस्पर्शे जानुमात्राधः खड्ग पादः॥पार्श्वकण्डुयनेन चा ग्रमान्त्राधो भूली॥उरस्पर्शे कटिमात्राधः पशु की

59 रथाग्निः॥धूमदर्शने चित्तपीडा॥हीनदीनव्याधि परिपीडितजनदर्शने रोगः॥ध्वज छत्र पताका मद्य मांस घराद्यलङ्काराभोजरथीन्द्रवह्निज्वालाफल
मीन सुगाराजाङ्गनादीनां सन्दर्शने शुभं भवति॥विद्वद्ब्राह्मणाभिमुसाधुजनानांसे दर्शने धर्म्मः स्यात्॥इति निमित्तोक्तिः॥ ॥तदनुसूत्रपातन
आचार्योजनधनवलविवृद्धये सवत्र दक्षिणाकरेण सुवर्णसलाकिकामादाय ऐशान्यादिशमारभ्य दक्षिणावर्त्तेन दिक्सूत्रेण लिखेत्॥तथै
व घराद्यासहितवामकरेणं मूलसूत्रेणुलिखेत्॥ ॥ततो वास्तुनागं परीक्षयेत्॥तत्वधेनुप्रवेशंमारभ्य तवति दिवशेषु यावन्मीन प्रवेशो नवति
तदा दक्षिणाशिरः पश्चिमाभिमुखो नागः ततो मीन प्रवेशामारभ्य यावन्मिथुनप्रवेशोन भवति तदा पश्चिमशिरः उत्तराभिमुखनागः शेते॥एवं
मिथुनप्रवेशमारभ्य यावत्कन्याप्रवेशो न भवति तदा उत्तरः शिरः पूर्वाभिमुखनागः शेते॥तथा कन्याप्रवेशमारभ्य यावद्धनु प्रवेशो न भवति तदा

58 कशं॥ पृष्ठस्पर्शे पृष्ठोऽस्थि तत्प्रमाणाधः कटिस्पर्शे द्विकराधःप्रदेशे लोहकराठकं॥ लिंगस्पर्शेन हस्तप्रमाणाधरे त्रिलोहशल्यं। जंघास्पर्शेन द्व्यस्थि का
दशांगुलाधरे॥ गुल्फस्पर्शे षोडशांगुलाधरेऽश्वखुरः। पादस्पर्शात् द्वादशाङ्गुलाधरे शाल्मलीकराठको वा॥ पादकनिष्ठांगुलीस्पर्शेऽष्टांगुलाधरे
कांस्यं॥ पाष्णिस्पर्शे द्वादशाङ्गुलधरेऽभ्रकं॥ ॥ सूत्रपातनसमये यजमानस्य पार्श्वे स्थित्वा केनचिदन्येन पुरुषेण यस्य प्राणिनो नामसंकीर्त्यते
तदस्थि तत्रास्तीति निश्चयः॥ अकस्माद्धौरागत्य यदि विष्ठामुत्सृजति तदधोवश्यं तत्प्रमाणं कनकमस्तीति निश्चीयते॥ यद्यकस्मादागत्य पुरीष
मुत्सृजति बालकुमारिका तदा तदधोवश्यं तत्प्रमाणं रूप्यं भवेत्॥ भेकरतेन जलभयं॥ सूक सारिका हंस कोकिल मयूर जीवंजीवक चक्रवा २९
क वृषभाणां हर्षोपकूजने कल्याणाय भवति॥ सिंह गज मेघ मनोज्ञस्वने धनधान्यार्थलाभोदयाय भवति॥ शंख मंगल गीतका बालक्रोडेन

60 पूर्वशिरो दक्षिणाभिमुखनागः शेते॥ अनेनैतदुक्तं भवति तिथिक्रमेण एकैकं कोष्ठमाक्रम्य नागस्य संक्रमणं भवतीति॥ ॥ इदानीं वास्तुनागस्य क्रोडभागो
ऽभिभज्यते॥ तत्र शिरोधस्मादेकविंशतिकोष्ठकानि॥ पृष्ठात्तान्यार्द्धत्रयोदश कोष्ठकानि। परित्यज्य वास्तुनागक्रोडप्रदेशः॥ स च नवकोष्ठकान्यायामेन व्या
यामेन तद्दैर्घमिति॥ अथवा पूर्वोत्तरान्यश्चिमान्तपर्यन्तस्य दशांशेन क्रोडस्यायामः॥ तद्दैर्घ्यव्यायामः॥ क्रोडाद्दर्द्धाङ्गुरः पर्यन्तत्रिभागैकभागाधिक क्रोडायाम म
धिगुणं॥ क्रोडायामव्यायामेन तुल्यपृष्ठान्त॥ एवं दक्षिणोत्तर पश्चिमपूर्व उत्तरदक्षिण॥ वास्तुनागस्य शिरसि खानिते पितापुत्रादयो विनश्यन्ति॥ पृष्ठभागे
तु खानिते यजमानस्य मरणं देशत्यागो वा भवेत्॥ पुच्छे गोमहिष्यादिकं विनश्यतीति॥ विहारादि भूभागे वास्तुनागमालेख्य गर्त्तापूरं वास्तुनागस्य ३०
क्रोडभागे प्रथमतः खानयेत्॥ षोडशहस्तलयतो पलक्षित भविष्यद्विहार भूभागे प्रतिदिनपारे तत्तयो द्वाशाङ्गुल वास्तुनागस्य संक्रमणं भवति

61 तथाचतुर्दशहस्तप्रमाणालयनोपलक्षितं भविष्यद्विहारभूभागे प्रतिदिनं यवाधिकेकादशाङ्गुलं वास्तुनागस्य संक्रमणं ॥ एवं द्वादशहस्तप्रमाणालयनभ
विष्यद्विहारभूभागे प्रतिदिनं पञ्चयवाधिकनवाङ्गुलं वास्तुनागस्य संक्रमणं ॥ तथैव दशहस्तप्रमाणालयन भविष्यद्विहारभूभागे प्रतिदिनमष्टाङ्गुलं वास्तु
नागस्य संक्रमणं ॥ अथ वास्तुक्रोडलक्षणमाह ॥ षोडशहस्तप्रमाणभूभागे वास्तुनागस्य शिरोधस्तान्मार्द्ध … द्वाविंशत्यंगुलाधिकदशहस्तपृष्ठान्तः सार्द्धचतुरंगु
लाधिकसप्तहस्तं परित्यज्य यामेनान्त्रिविंशत्यंगुलाधिकचतुर्हस्तप्रमाणं व्यायामेन सार्द्धाष्टाङ्गुलाधिकद्विहस्तप्रमाणं वास्तुनागस्य क्रोडं ॥ एवं चतुर्दशह
स्त चतुर्दशहस्तप्रमाणालयनविहारभूभागे वास्तुनागस्य शिरोधस्तादेकविंशत्यंगुलाधिकनवहस्ते ॥ पृष्ठान्तः सप्ताङ्गुलाधिकषट्हस्त परित्यज्य यामेन पंचा
ङ्गुलाधिकचतुर्हस्तप्रमाणं व्यायामेन सार्द्धद्व्यङ्गुलाधिकहस्तद्वयप्रमाणं वास्तुनागस्य क्रोडं ॥ तथैव द्वादशहस्तप्रमाणालयनभविष्यद्विहारभूभागे वा

63 एवंरूपं वैरोचनस्वमात्वं वास्तुनागं ध्यायात् ॥ ॐ आः वरुणाय हूं स्वाहा ॥ ॐ आः कालिकाय हूं स्वाहा ॥ ॐ आः कर्कोटकाय हूं स्वाहा ॥ ॐ आः शंखपालाय हूं स्वाहा ॥ ॐ आः
महापद्माय हूं स्वाहा ॥ ॐ वासुकिने हूं स्वाहा ॥ ॐ आः तक्षकाय हूं स्वाहा ॥ ॐ आः पद्माय हूं स्वाहा ॥ ॐ आः अनन्ताय हूं स्वाहा ॥ इति पूजामन्त्रः ॥ तत्र सर्वो धराधस्थ
देवता ॥ वास्तुदेवता उरःस्थ रंगमध्ये न्यायगतेनस्थापयेत् ॥ तत्र वेधदोषपरिहारं तत्र विहारभूभागस्य श्रयोपि परीक्षनीयाः ॥ तत्र सन्धयः पञ्चसान्धि रूपसन्धिः कर्म्मस
न्धि मर्म्मसन्धि दिक्सन्धिश्चेति ॥ तत्र चतुःषष्ठिपदं कार्यं ॥ तथास्था दशसन्धयो विज्ञेयाः ॥ द्वे मध्ये सन्धि ॥ तयोरुभयोः पार्श्वतः उपसन्धयश्चत्वारि ॥ तद्बहिः कर्म्मसन्धय
श्चत्वारि ॥ तथैव तद्बहिर्म्मर्म्मसन्धयश्चत्वारि ॥ एवं सर्वे तोव हि दिक्सन्धयश्चत्वारि ॥ मध्यसन्धिप्रदेशे खानिते पुत्रादयोपि विनश्यन्ति ॥ उपसन्धौ देशान्तरगः स्या
त् ॥ कर्म्मसन्धौ त्वल्पदोषः ॥ मर्म्मसन्धौ यजमानोपि विनश्यन्ति ॥ दिक्सन्धौ सर्व्वार्थनाशो दरिद्रत्वं स्यात् ॥ तस्मात्सन्धिषु न खनेत् ॥ तत्र पूर्वस्यां दिशि वृषरसिस्व

62 वास्तुनागस्यशिरोधस्तान्यचाङ्गुलाधिकेंअष्टहस्तपृष्ठान्तसार्द्धनवाङ्गुलाधिकपंचहस्तपरित्यज्य यामेनसार्द्धचतुर्दशाङ्गुलाधिकत्रिहस्तप्रमाणांव्या
यामेनअष्टादशाङ्गुलाधिकैकहस्तप्रमाणांवास्तुनागस्यक्रोडं॥स्वमेन दशहस्तप्रमाणांनयनभूभागेवास्तुनागस्यशिरोधस्तादशहस्तेपृष्ठान्तनःदशा
ङ्गुलाधिकचतुर्हस्तपरित्यज्ययामेनत्रिहस्तप्रमाणव्यायामेनद्वादशाङ्गुलाधिकस्यैकहस्तप्रमाणावास्तुनागस्यक्रोडं॥सचनागशंखकुन्देन्दुवर्णो वामकर
स्वशिरसासंछाद्यदक्षिणारत्नगृहीतहस्तेननिजकटिषुसंस्थाप्यनाभिप्रवेशादधःप्रदेशभुजगाकारसहर्दस्तत्रफणायुक्तमनुष्यमूर्त्तिर्देहाराद्विभाम ३१
मभिव्याप्यशेते॥वास्तुनागस्यशरीरावस्थितान्यष्टोत्तरनागानक्षीररसोपचारैःपूजयेत्॥मत्रपूर्वाग्रेनीलवर्णकालिकः॥गुह्यदक्षेश्यामकर्कोटकं॥न
भेमणीलवर्णशंखवर्णं॥वाऊप्रदेशेकनकवर्णमहापद्मं॥हृदि दुर्वास्यामंवासुकिनं॥कण्ठेलाहसनतक्षकं॥कर्णेपद्मधवलं॥मूर्द्धिनीलमनन्तनाग

64 भावदिक्षुमेकर्म्मसन्धीनाममसन्धोवस्थितारूपिणीनामविद्यांसितवर्णांधर्मेचक्रमुद्राभिनयांपद्मचन्द्रोपरिस्थितांपूजयेत्॥मन्त्रः॥ॐवज्ररूपिणीयअःस्वाहा॥ १ ॥
नां मिथुनराशिस्वभावउपसन्धिमध्यसन्धउपसन्धीनामध्यसन्ध्यवस्थितावज्रभास्करानामविद्यारक्तवर्णांपूजयेत्॥ॐवज्रभास्कराय आःस्वाहा॥ २ ॥तदनुकर्कट
राशिस्वभावकर्म्ममर्म्मदिक्संधीनांमर्म्मसन्ध्यवस्थितांवज्रहूंकारीनामविद्यांनीलवर्णांपूजयेत्॥ॐवज्रहूंकारीये इस्वाहा॥ ३ ॥तथादक्षिणास्यान्दिशि सिंहराशिस्वभा
वदिङ्मर्मकर्म्मसन्धीनामर्मसन्ध्यावस्थितांवज्रविलासिनीनामविद्यांपीतवर्णांपूजयेत्॥ॐवज्रविलासिनीये ईस्वाहा॥ ४ ॥ततकन्यराशिस्वभावउपसन्धिमध्यसन्धि
उपसन्धिना मध्यसन्धिवस्थितावज्रमोहिनीनामविद्याईषत्पीतवर्णांपूजयेत्॥ॐवज्रमोहिनीयेउस्वाहा॥शेषंपूर्ववत्॥ ५ ॥तदनुतुलराशिस्वभावकर्म्म ३२
मर्मदिक्संधीनांमर्म्मसन्ध्यवस्थितांवज्रखेचरीनामविद्यामाकाशवर्णांपूजयेत्॥ॐवज्रखेचरीये ऊस्वाहा॥ शेषंपूर्ववत्॥ ६ ॥तथैवपश्चिमायांदिशि

65 विद्धराशि स्वभाववदिक्कर्म्मकर्म्मसन्धीनां मर्म्मसंध्य वास्थितां वज्रासनीनामविद्यां रक्तवर्णां पूजयेत्॥ ॐ वज्रासनीये स्वाहा॥ शेषपूर्ववत्॥ ७ ॥
ततो धनुराशिस्वभावस्वभाव उपसन्धिमध्यसन्धिउपसन्धीनामध्यवास्थिता वज्ररसनीनाम विद्यां रक्तवर्णां पूजयेत्॥ ॐ वज्ररसनीये स्वाहा॥ शेषपूर्व
वत्॥ ८ ॥तदनु मकरराशिस्वभाव कर्म्म मर्म्मदिक्सन्धीना मर्मसन्ध्य वास्थिता वज्रत्रासनीनाम विद्या नीलवर्णां पूजयेत्॥ ॐ वज्रत्रासनीये ओ स्वाहा॥
शेषपूर्ववत्॥ ९ ॥एवं उत्तरस्यां दिशि कुम्भराशि स्वभाव दिक्कर्म्म कर्म्म सन्धीनां मर्म्मसन्धौ वंस्थितां वज्रस्पर्शनीनाम विद्यां हरितावर्णां पूजयेत्॥
ॐ वज्रस्पर्शनीये ओ स्वाहा॥ शेषपूर्ववत्॥ १० ॥ततो मीनराशिस्वभाव उपसन्धि मध्यसन्धिउपसन्धिनाम मध्यसन्ध्य वास्थितां वज्रचेतनीनामविद्यां दूर्वा
वर्णां पूजयेत्॥ ॐ वज्रचेतनीये ओं स्वाहा॥ शेषपूर्ववत्॥ ११ ॥तदनु मेषराशि स्वभाव कर्म मर्म्म दिक्सन्धीना मर्म्म सन्ध्य वास्थितां वज्र विकाशिनी नाम

67 म भागेषु त्रिभागेनैकका व्यायाम॥ आयामस्तु भित्तिकोष्ठेन॥ व्यायाम त्रिभागैकभागेनैकका योउच्चं॥ ततश्चार्यो दानपतिना सह एककारवलेवालेपुरःसर॥ स्वहस्तेन चन्द्रस्थ
सूकारर श्मिपरमाणुसञ्चयरूपं क्रियमाने एककामृतपिराड विभाव्य॥ कलशजलेनाभिषिञ्च्य पञ्चोपचारैः संपूज्य नेत्रा विशोधयेत्॥ तथागतोय स्वभावं तन्त्व भा
वमिदं जगत्॥ तथागतोनिः स्वभावं निःस्वभावमिदं जगत्॥ कर्म्मकरमपि वज्ररक्षरूपं विभाव्य तस्य करतलांभोज वामेतरे चन्द्रसूर्यौ विभाव्य सितरक्तग
न्धैः पुष्पादिभिः संतोष्य तस्मै कर्म्मकराय दक्षिणां दद्यात्॥ तत्रैककां कारयेदिति॥ ततो दिग्ग्रहणमाह॥ मेषसंक्रान्तौ रवौ विशोधित तुल्यीकृत भूमध्ये ज
लसमेन निरूप्य दिक्शोधनं कुर्यात्॥ तत्र द्वादशांगुलोच्छ्रयं शंकुमध्ये त्र्यंगुल परीणाहं॥ मूर्द्धन्न सूच्याकारं स्वाद्दिरं रुद्रेरवेरा रविनं भूमध्ये च त्रोपरिस्था
पनीयं॥ चक्रस्य मध्यतोऽन्तपर्यन्तसंकाया मेनसमं॥ ततो दोसूर्योदय समये पश्चिमदिग्गमन च्छाया यासंकन्त पश्चिमी दिक्शोधनं॥ एवं मध्यान्हसमय

66 विद्यां धूम्रवर्णां पूजयेत्॥ ॐ वज्रविकासिनीये अः स्वाहा॥ शेषं पूर्ववत्॥ १२ ॥ तदनु कोदालाङ्कितकरं वज्रकर्मस्वभावं विभाव्य॥ तांबूलादिभिः संतोष्य॥ तेन वाम
कराग्रेण पूर्वोत्तरदिशा तनेन खानयेत्॥ तत्तोपुरं॥ ततोऽधस्तज्जलं विद्याकर्मेण॥ र्थं पद्मसूर्योपरि स्थितेनयशरीरं स्थदक्षिणकराभ्यां मङ्कुश मंत्रमालिनं वामा
भ्यां हस्ताभ्यां शंकमराडुधरं जटाजूटेन तमाङ्ग॥ विशालत्रिनयन विभूषितमुखं यज्ञोपवीतरक्ताम्बराभरणविभूषित।स्वश्रृंगारलोहितानिमावाह्य॥
अर्घाद्यैर्वाह्यपूजादिभिः सेपूजयेत्॥ जवाशोकार्कककेलिकाष्ठसमिद्भिः पुरःसरं जुहुयात्॥ ॐ लोहिताग्नये आकर्षये स्वाहा॥ तिलादिभि
श्च जुहुयादिति॥ ॥महापण्डितकल्याणरक्षितविरचितायां पञ्जिकायां तृतीयप्रकरणं॥ ९०॥ ॥इष्टकालक्षकसम्यक्ज्ञात्वादि ग्रहणान्ततः सम्य ३३
गायव्यययोज्ञात्वा प्रासादस्य च लक्षणं॥ देवदिक्च्या लवतुधाः संख्याचयथाविधि. यति॥ इष्टिकारोपणं कर्त्व्यं शुभमङ्गयोगप्रमोहूत॥ तत आयोमपञ्च

68 उत्तरस्यां दिशिछायामंकयेदुत्तरदिक्संशोधनं॥ तथैवास्तमये लायां पूर्वदिग्गतच्छायायामङ्कयेत्॥ पूर्वदिक्संशोधनं॥ ॥इदानीमायव्ययावभिधीयते॥ व्यायामेन
गुणो दीर्घचतुर्विंशतिभिः हृत॥ यावसुभिर्हृते शेषस्तमायमिहानिर्दिशेत्॥ वसुभिर्गुणितं पिण्डं नक्षत्रेभ्यः प्रदापयेत्॥ नक्षत्रहृतशेषाणां नक्षत्राणां विनि
र्दिशेत्॥ नक्षत्रवसुभिर्हृते भवन्ति यः शेषो व्ययः सर्वथा नक्षत्रगुणिते युगे ग्रहगणो शेषो हृतादंशकः॥ पिण्डमङ्गलवर्द्धितं गुणरसैः शेषहृता जीवितं स्कन्ध
भोजितजीविकाङ्गवति यः शेषश्च मृत्युः सदा॥ अयमर्थः॥ लयतायाम हस्तसंख्या व्यायाम हस्तसंख्याभिर्गुणयेत्॥ तथा हस्तापूरितायामाङ्गुलिसंख्यांह
स्तांपूरितव्यायामांगुलाभिर्गुणायेत्॥ गुणितहस्तसंख्या पुनश्चतुर्विंशति सप्तविंशतिभिः सप्तविंशतिभिहरेत्॥ तच्छेषाणां कृत्तिकादिनक्षत्राणां ३४
भवन्ति॥ नक्षत्र॥ ॥कृत्तिकादिनक्षत्रेषु वसुभिः रष्टभिर्हृतेषु शेषो व्ययो भवन्ति॥ व्यय॥ ॥कृत्तिकादिनक्षत्रेषु चतुर्भिर्गुणिते पुनरवभिर्नवभिर्ह

69 तेषुयच्छेषानवांशकंभवति॥शेऽङ्ककस्यात्॥अंशकः॥ ॥तथापिराडमष्टभिगुणिते षष्ठिभिःषष्ठिभिर्हृतेषुशेषानिजीवितानि॥जीवितः॥ ॥
जीवितेषुपञ्चभिःपञ्चभिर्हृतेषुयःशेषस्तेन पृथिव्यादिनाप्रलयाभवतीति॥मरणं॥ ॥अत्रपूर्वस्यांध्वजपक्षिराजः॥अग्नौधूमोमार्जारः॥यमदिशिसिंहे
नैऋत्यांस्वाने॥वारुणांवृषोद्विजिह्वः॥वायव्यांखरोमूषकः॥उत्तरस्यांगजः॥ऐशान्यांध्वांक्षोमेषः॥एषांपक्षिसर्प्ययोर्द्विजालमूषयोगजसिंहयोमेषश्वनोर
न्योन्यविरोधीत्वात्॥लयनायामव्यायामाक्रान्तहस्ताङ्गुलिसंख्यासु यथापरस्परविरुद्धानभवंति॥तथैवकुर्यादिति॥ ॥इदानिंप्रासादलक्षणमभिधी
यते॥आयामस्याईस्याद्यायामः॥किंतुकिंचिन्मानाधिकंक्रान्तहस्तांगुलिसंख्यासु यथापरस्पर स्थितिप्रदेशतःस्थूणापर्यन्ताधःकरिणका॥ ७ ॥
नतुल्यवोईकरिडका॥गर्त्तापुरंतुविशेषेण क्वचित्त्रिमेखलायुतं॥क्वचित्पञ्चमेखलयुत॥क्वचित्सप्तमेखलायुतं॥क्वचिद्वारिपर्यन्त क्वचिच्छिलापर्यन्त॥इत्या

71 कारिका॥तत्रपश्चिमोत्तरोयमसूर्यः॥पूर्वपश्चिमागृहचूली॥दक्षिणोत्तरःकांच॥पूर्वोत्तरोदण्डाख्यः॥पूर्वदक्षिणोवानाख्यः॥दक्षिणापश्चिमस्तुसि
द्धार्थः॥यमवरुणोत्तरप्राक्सालविद्धाःप्रासादायथाक्रमः॥शूल्ली॥पक्षिघ्नीहिरण्यनाभसुक्षेत्रनामधेयाः॥तत्रशूलीवित्तविनाशिनी॥पक्षघ्नः
पुत्रनाशवैरकरः॥सर्वार्थसंपत्तिसुखप्रदाहिरण्यनाभ॥सुक्षेत्रोधर्मधनगोपसूनांवृद्धिकरः॥त्रिशालस्य॥ ॥चतुःशालप्रासादास्तुरुचकस्वस्ति
कवर्द्धमाननंद्यावर्त्तसर्वार्थसिद्धिसंज्ञकाः॥तत्ररुचकमिदमुच्यते॥यत्पुर्वोत्तरपश्चिमदिक्षुवत्यत्तरस्यांदिशिमूलद्वारैनैकेनोपलक्षितं॥गर्त्तापुरेवहिर
भ्यन्तरमध्यस्थांभित्तित्रयरूपलंकितः॥ऊर्द्धकरिडकेतुभित्तिद्वयविभूषितमेकभित्तिविभूषितंवा॥त[illegible]यदाएकभित्तिविभूषितंतदाभित्तिस्थानेस्त
म्भपंक्तिविभूषितं॥उभयप्रान्तपर्यन्तमायामः॥सचत्रिंशद्धस्तमारभ्यावद्धस्तसहस्रकः॥आयामस्यपञ्चभागैकभागप्रमाणोव्यायामः॥व्यायामस्यपञ्च

70 लोच्य कर्तव्यां।जलनिर्गमनस्थानस्य नियमोऽभिधीयते॥ तत्र यदा कल्याराजन धनविवृद्धिरिष्यते॥ तदा वायव्यां वज्रदीपमहाकालकोष्ठकयोरन्तजल
निर्गमनं कुर्यात्॥यदा त्वायुरारोग्यसुखानां विवृद्धिरिष्यते तदा कपर्दिदिशेवज्रगन्धो घोषकोष्ठकयोः पूर्वे जलनिर्गमनं कुर्यात्॥ निर्दोषार्थ नाडीसन्धिद्वारा
णां वेध परित्यजेत्॥ ततो लयन व्यायामस्य त्रिभागे कभाग चतुर्भागे कभागो वा वेदी धारा पाते भुजगोमत्तवारणा शिखरस्था॥ तदर्द्ध प्रमाणा भित्तिः॥ ॥
इदानीं विशेषलक्षणमभिधीयते॥ एकशाली द्विशाला त्रिशाला श्चतुःशालाः प्रशादाः॥ यदि पश्चिम शाला एकशाला प्रासादस्तदा धन हानाय भवेत्
एवमुत्तरशालैरेकशाला यजमाना नजोवाते॥ तदा पूर्वशील एकशालस्त दासन्तानवृद्धिर्न भवति॥ ततश्च दक्षिणादिकस्थउत्तराभिमुखएकशालप्रासादो ३५
जनधननायुः प्रदाभवति द्विशालप्रासाद यमसूर्य गृह चूलिकाव दराडाक्षवाताक्षः सिद्धार्थाः॥ मृत्यु धननाश ज्ञाति विरोध राजदराड कलहो द्वेगार्थ भ्राम

72 भागेषु त्रिभागाभ्यंतरे मध्यभित्तिः स्तम्भस्था॥ अभ्यन्तरन्तु भयकरिकयोः स्तम्भपंक्तिरेवकर्तव्या॥ द्वाराद्बहिः प्राचीरे सांति वङ्क द्वारो न करणीयः॥ तत्र रुचकं सर्व
तस्तुल्यमानं॥ आयुर्ज्ञन धनक्षेमलक्ष्मीप्रदं भवति॥ एवं पूर्वापरोभयोर्दक्षिणोत्तरयोर्वा उभयप्रान्त पर्यन्तायामो यस्य स स्वस्तिकाख्यः प्रासादः॥ आयामस्य
षड्भागे कभागप्रमाणो व्यायामः॥ उभयपार्श्वस्थ प्रासादयोरपि ताभ्यां समो व्यायामः॥ आयामस्तु व्यायामस्य द्विगुणं॥ तत्र दीर्घयोर्द्विद्वारं॥ ह्रस्व प्रासादयो
योस्त्वेकैकं द्वारं॥ स च स्वस्तिक प्रासादस्तत्र स्थितानां सत्वानां धनजनकुडुम्बायः पशुयशोवर्द्धनं करोति॥ ॥यत्र वामदक्षिणपार्श्वे तउत्तरमुखसोन्नद्ध या ३६
पत्नां दक्षिणा शालीभवति॥ पश्चिमोत्तरपूर्वे शालास्थसोमरहिता भवन्ति॥ तद्धनधान्यविवृद्धिकरं वर्द्धमानमुच्यते॥ ॥यत्र तु वामपार्श्वे तक्षणायुताश्च
नुः शाला भवन्ति॥ तच्च नधन सुखावाहं नन्दिकावर्तमाहुः॥ ॥यत्र पुनः सोन्नचतुष्कसहिताऽष्टशाला भवेयु॥ स्तदपि धनधान्यविवृद्धिमर्थो थासेद्धिमा

73 जः॥ ॥देवालयस्य तु विशेषः॥ चतुरस्रेणैकाशीति कोष्ठकेषु कृतेषु बहिर्द्वात्रिंशत्कोष्ठकैः प्रथमद्वितीयकरिण्डकयोर्भित्तिकाः कार्याः॥ करिण्डकात्प्रथ
मव्यायामेन समोच्चं द्वितीयात्तु कोष्ठेन न्यून॥ तदुपरि तृतीयचतुर्थकयोर्भित्तिका तु कार्याः॥ अथ करिण्डकायामस्य नवविभागेषु पञ्चभागेन तदूर्ध्वकरिण्डक
योर्व्यायामः॥ षड्भागेन वा॥ तेन नवकोष्ठकेषु कृतेषु बहिःकोष्ठकैर्भित्तिकाः कार्याः॥ उच्चस्तु तृतीयकरिण्डकायाः प्रथमकरिण्डकायास्त्रिभागैकभागेन॥ अ
स्याद्विगुणेन चतुर्थकरिण्डकाया उच्चा॥ वेदी तु भित्तिकाद्वयेन॥ ॥तत्र पादस्थापनमाह॥ सम्पन्नकरिण्डशोधितेषु सोभनमृत्तिका परिपूरितेषु सम्यगाकोटि
तेषु गर्त्तोपरिकेषु कनकरूप्यकाञ्जोपरि सुवर्णरूप्यघटितनवकूर्म्मान्यसेत्॥ तदुपरि दक्षिणावर्त्तेनाग्नेयादिकोणेषु॥ नील हीरक मरकत पद्मराग पुष्य
राग पेचामृत पंचगव्य पारारस परिपूरितोदराणि॥ विभवानुरूपतः सुवर्णरूप्यताम्रैः परिघटितानि पिनद्धवक्त्राणि॥ ॐ वज्रयक्ष हूं इति मन्त्रेणाष्टा

75 रवं जं विश्ववज्रनद्रश्मिसमूहैर्वज्रमयीं भूमिं वज्रप्राकारं वज्रपंजरवितानं विभाव्य॥ विश्ववज्रवेदिकायां भ्रूं जं चक्रपरिणामेन वैरोचनं तत्परिणामेन विहारा
दिकं विभाव्य॥ इष्टकानामधिष्ठानं कुर्यात्॥ ॐ वज्रकर्मक। ॐ वज्ररक्ष हूं। ॐ वज्रयक्ष हूं। ॐ वज्रसन्धि वं॥ इति मन्त्रेण॥ तत्र समलपक्षु पादाङ्कितकङ्क
शीर्णचर्मकीकरवादिनांसविहीना इष्टकाः परित्यज्य॥ पक्काः उज्ज्वलचारुलक्षणाः इष्टकाः संगृह्य॥ पद्मोपरि संस्थाप्य। भ्रूंकारपरिणामसञ्चयरूपाध्या
त्वा कलशजलैरभिषिच्य॥ पंचोपहारपञ्चगन्धसिन्दूरालक्तककुसुम्भकुसुमप्रियंगुसिततिलयज्ञोपवीतादिभिश्च संपूजयेत्॥ ॥ततो भूपति
स्थपतिपतिकर्मकरप्रेक्षकलोकान् यथार्हं कुङ्कुमाञ्जलीयकवस्त्रशिरोपस्कक पूगताम्बूलादिभिः सम्यक् परितोषयेत्॥ यजमानेन हस्ते चेष्टकां समर्प्य
येत्॥ ततः पूर्वेन रदिङ्मुखपृथ्वीस्थनागतवायुस्तथागतचन्द्रसूर्येलोकनपरःस्थपतिमुखाद् दक्षिणावर्त्तेनेष्टकानां पूर्वोत्तसगं कृत्वा आग्नेयनैर्ऋत्य

74 शान्तरक्षानवारं परिजप्यामि॥ चत्वारि मधुकुम्भानि चतुःकोणेषु संस्थाप्य॥ तदुपरि समीकृत्येष्टकोणपरां कुर्यात्॥ ततः शोधितभूमध्ये आचार्यः समाधित्रयभा
वनापूर्वकं मनोमयीभिः पूजाभिस्तत्रस्थसमस्तदेवादिकपालनागवसुरावुद्ध बोधिसत्वान् संपूज्य अर्घपाद्याचमनञ्च दत्वा बाह्यैः पुष्पधूपादिभिश्च संपूज्य
गगनेस्थापयेत्॥ ततः ॐ भूः खमिति मन्त्रेण शून्याकृत भूभागे हूं लं हूं इति मन्त्रेण वज्रधरमाण्डमयीं विभाव्य॥ ॐ मेदिनी वज्रीभव भव वज्र । बन्ध हूं॥ इत्यनेन
नमन्त्रेणाधितिष्ठेत्॥ ततः सव्यकरे हूं हूं त्वे षणात्रिहूत्वा तेन हूंकारकिरणेपरज्जुरूपग्रहणेन धनिभिश्च पृथिव्याः संचोदनेन निःसृतां हस्ताभ्यां कनक ३७
कलशधारिणीं सर्वालंकारभूषणां पीनां पृथ्वीदेवतां विभाव्य॥ पाद्याचमनार्घादिकं दत्वा पुष्पादिभिः संपूज्य। त्वं देवीत्यादि विहारं स्थापयाम्यहं
मिति पर्यन्तं त्रिःपठेत्॥ ततस्तेनैवाङ्गनप्रदेशे विलीनं विभावयेत्॥ ततः तस्यां भूमौ यं रं वं लं सुं कारजवाय्वग्निजलपृथ्वी सुमेरुणामुपरि हूंका

76 वायव्येशानकोणेषु स्थापयेत्॥ ततः स आचार्येण वज्ररक्षसमयमुद्रयेतन्मन्त्रेणाधितिष्ठेत्॥ ॐ वज्ररक्ष दृढो मे भव रक्ष सर्वान् स्वाहा॥ सप्तधा दक्षिणा सवज्रेण ॐ
भ्रूं सर्वे तथागताः सर्वबुद्धालयमाधितिष्ठन्तु स्वाहा॥ इति मंत्रेण प्रतिकोण सप्तवारमधितिष्ठेत्॥ सतोक्षरेणाचद्दढोकृत्य कलशजलेनाभिषिंच्य पुष्पादिभिः
संपूज्य घण्टां च वादयेत्॥ तस्मिन्काले सद्धर्म्मपाठमङ्गलगीततूर्यनिर्घोषैश्चानंदयेत्॥ यजमानेनच सम्यग्गत्साहयुक्तेन जलधारापातनं कार्यं॥ ततः समस्तविघ
घ्नगणाय विश्वपरिस्फुरत्लीलास्पर्द्ध विचित्रवस्त्राभरणोपवीतविभूषितेः॥ शुद्धिशुद्धस्योम्यायतचारुनेत्रविभूषितषन्मुखेः॥ प्रकृष्ट जयप्रवन्धाज्वल ३८
रत्नमौलौवरदाक्षसूत्रत्रिसूत्रकमण्डलुविराजितचतुर्भुजे॥ शोभनतरकुंकुमवर्णोपेतसांतमूर्तिके। प्रमोदाग्निसन्तर्पयेत्॥ सुगन्धकाष्ठसमिधिः सुगन्धद्रव्येश्च
तिलादिव्रीहिश्च जुहुयात्॥ मन्त्र॥ ॐ वज्रप्रमोदनाग्नये स्वाहा॥ ॥इति महापण्डितश्रीकुलदत्तविरचितायां पंजिकायां चतुर्थप्रकरणं॥ ॥दारुकर्म्मतुतं

77 तेनोच्यते॥वनयात्राततो द्वारसम्प्रगत्थापयेत्सुधी॥संस्थाप्यचशिरोदारुत्रूऊयादमृतानल॥ तत्रश्चभतिथि ग्रहणाक्षेत्रेषुचैत्यायतनविहारादीना
यष्टिकाद्वारदेहलीस्तंभादिशिरोदारुपर्यन्तानामा यानव्या यामीष्ठपतिसूत्रधारादिभिः सम्पगालोच्या॥तक्षकपरिजनसामग्रीभिःसह॥यजमानाचार्याभ्यां
वनयात्रायातव्या॥प्राप्तेचवनसन्निधौवेलाग्निरुप्यात्मानसार्द्धेकम्मिकरूपंविभाव्य॥दक्षिणपादमग्रतःकृत्वापूर्वोत्तरदिग्वदनःसन्नाचार्योवनप्रदेशंप्रवि
शेत्॥अपूरितविंशतिवर्षोत्तरुणास्तरवडपादपाः॥ततश्चद्विवेशरमालूर॥तिन्तिसार॥सुरदारु॥खदिर॥गम्भारि॥मधुकाशोक·वकुल·वैजयंती·कुचन्द
न·चम्पक·चन्दन·किंशुक·पलास·पिच्छिल·वलदल·सरल·साल·ताल·ग्रन्थिलार्जुन·जंबु·भण्डिल·रोहिणी॥प्रभृत्यनेकेषुवृक्षेषुयोयत्रोपयोगपन्नंवृक्ष
समभिवीक्ष्य॥विकालवेलायांसार्द्धकर्म्मिकयोगवानाचार्य्यःसमुत्साह॥तक्षकसहशिल्पिनसंरक्ष्य॥पंचोपचौरगुरुबुद्धबोधिसत्वादिभ्योनिवेदनवृक्षदेव

79 वृक्षेचण्डालीक्षेत्रपालसुजनना॥ ९ ॥अश्वत्थवृक्षेमहालक्ष्मीक्षेत्रपालवह्निमुखः॥ १० ॥ततःकर्म्मानुरूपतोवृक्षदेवतायाःक्षेत्रपालस्य
चाकारंविभाव्यस्वस्वमन्त्रेणपूजयेत्॥ॐ वं महाकालायनमःस्वाहा॥ॐ एं गृध्रकायनमःस्वाहा॥एवं ॐ मं महाभैरवेनमःस्वाहा॥ॐ लों
लोकमानकायेनमःस्वाहा॥ॐ अः अतिवलायनमःस्वाहा॥ॐ कों करालमोटिकायेनमःस्वाहा॥ॐ वः वलायनमःस्वाहा॥ॐ अं अम्बिकायेन
मःस्वाहा॥ॐ तुं तुर्द्धकेशायेनमःस्वाहा॥ॐ शं शंकरिकायेनमःस्वाहा॥ॐ घं महाघण्टायनमःस्वाहा॥ॐ सुं सुमुखायेनमःस्वाहा॥ॐ चं
चण्डचण्डायेनमःस्वाहा॥ॐ कं करञ्जवासिन्येनमःस्वाहा॥ॐ पुं पुंसेश्वरायनमःस्वाहा॥ॐ शों शोकायेनमःस्वाहा॥ॐ सुं सुजनेत्रेनमःस्वाहा॥
ॐ चं चण्डाल्येनमःस्वाहा॥ॐ वं वह्निमुखायनमःस्वाहा॥ॐ मां महालक्ष्म्यैनमःस्वाहा॥विहारस्यनिमित्तंवृक्षछेत्तुंसमुपयोग्याहं॥स्तत

78 ताप्रभृतीन्संपूज्यदिग्वलींचदत्वा॥तक्षकसहायशिल्पिनाभक्षभोज्यान्नपानतांबूलादिभिःसम्यक्परितोष्य॥वृक्षदेवताश्चभगवन्नित्यादिगाथाभिविज्ञप्य॥
प्रामोयाचितेतक्षसहायशिल्पिभिःसार्द्धमिष्टदेवतायोगतःशान्तमनास्वपनंकुर्यात्॥ततःशुभस्वप्नसत्ववश्यनियमेनसंसिद्धस्यात्॥तुःस्वप्नेसार्द्धकर्म्मिकमंत्र
जपेत्॥ततःप्रत्युषसर्वपूजाभिःसमायुक्तःआचार्य्यमहावैरोचनयोगीतदनुदेवतारूपंवृक्षराजसंपूजयेत्॥तत्रताश्चवृक्षदेवताःतेचक्षेत्रपालाः॥सुरदारु
द्विकेशांस्वमपकाशोकवृक्षेषुवृक्षदेवताशुह्यकाक्षेत्रपालोमहाबलः॥ ॥तेसौशालवृक्षस्लोकमातृकाक्षेत्रपालोमहामेरुः॥ २ ॥हरितहरीतकीवटवृ
क्षेषु.कर्णमोटिकाक्षेत्रपालाऽतिबलः॥ ३ ॥चूतवृक्षेअम्बिकाक्षेत्रपालोबलः॥ ४ ॥तालवृक्षेसकृरिकाक्षेत्रपालऊर्द्ध्वकेशः॥ ५ ॥कदम्बवृक्षेषु ३९
सुमुखाक्षेत्रपालोमहाघराट॥ ६ ॥करंजेकरंजवासिनीक्षेत्रपालश्चरौद्रघरोष्ठः॥ ७ ॥मधुकवृक्षेसैकाक्षेत्रपालःपुंसेश्वरः॥ ८ ॥कांचन

80 व्याहमिदानीपुष्पाभिःश्वात्यवृक्षतःस्थेयं॥इतिगाथात्रिपठेत्॥वृक्षस्थदेवतायाश्चा॥ततःपुष्पादिभिःसंपूज्यात्मवृक्षेगतान्चिन्तयेत्॥ततोरक्षा
र्थेमहामायूरीपाठयेत्॥तदनुसार्द्धकर्म्मिकरूपंतक्षकंसुवर्णवस्त्रतांबूलादिभिःपरितोष्य॥कुठारश्चमधुनाविलिप्यातेनचम्भु मंचितेनतक्षकेन
करोद्वतपूर्वोत्तरमुखेनसूर्यमालोक्यवृक्षस्छेदनीयः॥तत्रचशुभाशुभनिमित्तमवलोकयेत्॥अशुभनिमित्तंपरित्यजेत्॥अशुभनिमित्तेसंग्रह
कुर्यात्॥ ॥यदिपतनस्तूत्तरादिशिवृक्षस्तदायजमानस्यधनकर्म्मसिद्धिस्यात्॥ऐशान्यदिक्पातेविघ्नानांनाशोभवति॥ऐन्द्यांदिशियदिपतो
ततहस्तदास्याज्जयलक्ष्मीविभूतयः॥एवमप्यन्यवृक्षास्याविमर्दनेनान्तरालेयदिपतेत्॥तदाशुभसुखायेवभवति॥यद्यन्यवृक्षमाश्रयपतते ४०
यजमानस्यमहतीनीतिस्यात्॥अग्निनैऋत्ययमवरुणवायुदिक्पातेअग्निभयरोगमरणजलवायुभयोनिर्भवन्ति॥यथासंख्या॥वलनकुजनदुरपत

81 नमपियजमानस्य दुःखं निमित्तं भवति॥ छेदनसमये यदि उष्ट्र श्वशृगाल खर सर्प्प शूकर गृध्र काक कादि दुष्ट पक्षिणां दर्शनं भवेत्॥ तदावश्यं वध
बन्धनानेक विघ्नानि भविष्यन्ति॥ वृक्षाद्यदि रुधिरं स्रवति तदा यजमानस्य मरणं भवेत्॥ दधि घृत मधु क्षीर स्रुतो तत्र वधबन्धनादि भयानि भवन्ति॥
किं तु यदि वृक्षाणां स्वाभाविक मधुर कटु तिक्त काषायादि स्वादो भवेत्तदा न दोषः॥ माञ्जिष्ठवर्णेन मण्डूकमनुमेयस्तेन च व्याधिः॥ स्वेतकपिलवर्णे
न मूषिकमनुमेयं गर्भे भवेद्वृक्षस्तेन च तस्कराभयं॥ श्वासरोगश्च जायते॥ पीतवर्णे तत्र वृक्षाभ्यन्तरे गोधामनुमेयात् येन च धननाशो भवेत्॥
कपोतवर्णेन तत्र गर्भे गृहगोधानुमेया तेन यजमानो दरिद्रो भवेत्॥ अरुणवर्णेन कृकलासोऽनुमेयस्तेनानेकरोगा जायन्ते॥ श्यामवर्णेः सर्प्पो गर्भे
भवेत्॥ तेनापि धनक्षयमेव॥ खड्गवर्णेन जलमनुमेयं तेन जलभयमेव स्यात्॥ छत्र ध्वज स्वस्तिक श्रीवत्स कलश चामर चक्राम्भोजनं यावत्तव

83 पञ्चगव्ये लिप्त्वा सुगन्धोदकैः स्नापयित्वा गन्धादिभिरभ्यर्च्य वृक्षप्रशंसा वोक्तानि सर्वाणि कर्माणि तत्रापि कर्त्तव्यानि॥ ततो नगरप्रवेशसमये वृक्षाणां शिला
नां वा राजनि पौरजनेषु वा वार्त्तां विधाय मदनमद स्फूर्त्तिमूर्त्तिभिः पुष्टचित्तैर्जनैर्वा हरयेत्॥ पूर्णकलश प्रदीप नानातूर्य निर्घोष कोलाहलै चैरन्दीभिः॥
स्वामिभिश्चानि सादरेण प्रवेश पविस्तरेषु समभूमिषु पिष्टकां भोजनमध्ये स्थापयेत्॥ अत्र द्वारादीनां स्थापनं माघ फाल्गुण वैशाख ज्येष्ठ आषाढ का
र्त्तिकमासे शुक्ल द्वितीया यात् तृतीयायां पंचमी सप्तमी दशमी त्रयोदशी पूर्णमासु सोम बुध बृहस्पति शुक्र वारेषु॥ रोहिण्यां धनलाभाय मृगशिर सोन्यर्थं मा
घायां सौभाग्याय पुष्याय जयाय उत्तरायां पूजा वृद्ध्यर्थं हस्ताया सिद्धि निमित्तं ज्येष्ठाया सुखाय मूल श्रवणायो रोगमपरिज्ञानाय॥ आशाढायां पुत्र वि
वृद्ध्यर्थं भाद्रपदायां धन वृद्ध्यर्थं सौम्यग्रहाश्विनेषु भलग्नेषु भशुहूर्ते निरूप्य कर्यात्॥ ॥ इदानीं द्वारादीनां प्रमाणमभिधीयते॥ तत्र यथा

82 ङ्गेमानांकशानित्रशुभचिन्हानि॥ एवमादिव्यखिलानिशुभाशुभलक्षणानिपरिज्ञायवृक्षस्यच्छेदनंकुर्यात्॥ ततोविच्छेदितमपिवृक्षंसम्यग्वि
भेद्यमूलमध्याग्रभागेग्रन्थिकंविहत्यदशभागेकभागेनाधिकप्रमाणंकुर्यात्॥ ॥यथावृक्षाणांवनयात्रा॥ तथाचेत्यविंवाद्यर्थंशिलानामपिव
नयात्रागन्तव्या॥ शिलाचप्रशस्ताग्राह्या अप्रशस्तापरिहार्य्या॥ तत्रपर्वतग्रस्थनटनीतटादिषुसंस्थिताशिला॥ घनकठिनसुगन्धिसुस्वरशीतस्प
र्शामध्यवयोनिविडकोमलसुस्निग्धाशुवनी॥ एतेद्वप्रशस्तेशीतपीतहरितरक्ते॥ कृष्णाचशिलायदिशीतरेखासूक्ष्मबिन्दुभिःसंयुताभवेत्तदावृद्धि ८१
कुटुम्बसंतानकुलराज्यसंपत्तिदीशाप्रशस्ता॥ उर्द्धातरेशपूर्वदिग्वदनायथासंख्यंखेचरसिद्धिजनधनकुलवृद्धिमोक्षाभिमतसिद्धिदाशिलाग्राह्या।
अतिकोमलाटङ्काघाटासहावाला॥ रूक्षविवर्णाक्रान्तिनिस्वराशिलावृद्धा॥ एतेद्वपिपरित्याज्या एवंप्रशस्ताप्रशस्ताःशिलाज्ञात्वा॥ प्रशस्ताशिला

84 क्रमः॥ ब्राह्मणक्षत्रियवैश्यशूद्राणांप्रायेनशान्तिकजयवश्यपौष्टिककरनानांध्वज सिंह गज गाव आक्रान्तयोदातव्या॥ तेचयवाङ्गुलहस्तेनतत्रसन्नप
रमाणुभिरत॥ अतसन्नभिःसूक्ष्मरजः॥ सूक्ष्मरजःसन्नभिःशशरजः॥ शशरजसन्नभिःएडकरजः॥ एडकरजःसन्नभिर्गोरजः॥ गोरजःसन्नभिर्यूका॥ यूकासन
भिःर्य्यवः॥ षड्यवैःकम्पसाङ्गुलिः॥ सप्तयवैर्म्मध्यमाङ्गुलिः अष्टयवैर्ज्येष्ठाङ्गुलिः॥ द्वादशाङ्गुलिभिर्वितस्ति॥ वितस्तिद्वयेनहस्तः॥ इतिवर्णभेदाङ्गु
लीयाः॥ ७ ॥ तत्रप्रासादानामष्टांशेनवादशांशेनवाद्वारस्यव्यायामः॥ सचद्वात्रिंशन्मात्रिकभतदद्विगुणआयामः॥ द्वादशमात्रिकाउदेहलीर्वहलीच॥
अथवासार्द्धाष्टमात्रिकैः॥ सार्द्धपरमानतकेनवाहु॥ अथवासार्द्धचतुर्म्मात्रकः॥ तद्बहिःसार्द्धद्विमानकप्रमाणउपबाहुः॥ सार्द्धकमानकेनवा॥ तस्यवहिः ४२
पञ्चमानकेनशाखासमाविसमावाकार्य्याः॥ बाहुनीनिर्यूहःसार्द्धचतुर्दशःमानकेना एवंविंशतिमानकेनपल्लवः॥ तस्याद्वेधोयथाक्रमेसार्द्धपरमान

85 कः पञ्चमात्रको वा॥ अस्मिन्दारुकर्म्मणि॥ यथानुरूपतो वज्ररत्नपद्मचक्रदेवनागयक्षविद्याधरादिनानालंकारतोरणादिकञ्च यथाशोभनं कुर्यं
त्॥ देवालयस्यानुकोष्ठद्वयेन द्वारस्य व्यायामः॥ शेषं पूर्ववत्॥ ॥स्तंभाः सर्वसमग्राः परिणाहारोहयुताः॥ शोभनतरसमसंस्थानाः सुदृढदारु
निर्म्मिताः॥ अवकाशश्चतुरस्राद्विगुणोपेताः॥ तत्र सार्द्धाष्टमात्रकेन सप्तमात्रकेन वारम्भस्य व्यायामः॥ आयामस्तु यथानुरूपतः कार्य्यः॥ चन्द्ररेखा
या अधःप्रदेशस्तम्भायाममध्ये॥ तदुपरि घण्टामात्रकाः परितस्तत्र सार्द्धद्विमात्रकेनाष्टांशेन तदूर्द्ध्वं सार्द्धकामात्रकेण षोडशांशहारपट्ट॥ पद्मं वा॥ तदु
र्द्ध्वमष्टमात्रके॥ कवचयुतो मणिभागः॥ तदुपरि सार्द्धद्विमात्रकेनाष्टांशः॥ तदूर्द्ध्वमात्रकेण हारपट्टी॥ नागपुष्पपंक्तिर्वा॥ तदुपरि द्विमात्रिकेणाष्टां
शापद्मद्वयं॥ तदुपरि द्विमात्रकेन चतुरस्रं॥ तदूर्द्ध्वमेकमात्रकेणाष्टांशं॥ तदुपरि मात्रकार्द्धेन वर्त्तुलं॥ तदूर्द्ध्वं घण्टामात्रकेन वीरकं॥ तदुपरिमात्रके

87 स्तुत्वा समयसत्वेन सहैकीभूतं पश्यन् तत्परिणामेन पूर्वद्वारं विचिन्तयेत्॥ तत्र यद्यपि सर्वसमाधीनां निष्प्रपञ्चनिर्विकल्पतयैकरसत्वेऽपि क्रियाभेदा
द्भिद्यन्ते॥ तद्यथा येन समाधिना सर्वसमाधिं विमलीकरोति स विमलसमाधिरित्युच्यते॥ १॥ तथा दक्षिणद्वारे हूंकारजं विश्वाब्जसूर्य्योपरि आली
ढपदस्थं द्विभुजं श्यामं खड्गपाशांकपाणिं गगनगञ्जस्वभावं कनिक्रोध नाम क्रोधराजानं विभाव्य॥ ॐ आः वज्रकनि महाक्रोध हूं। इत्यनेनाष्टोत्तर
शतवारमधिष्ठाय तत्समं ज्ञानसत्वमानीयार्घादिकं दत्वा पुष्पादिभिः संपूज्य समयसत्वेन सहैकीभूय तत्परिणामेन दक्षिणद्वारं विचिन्तयेत्॥ २॥
तथा पश्चिमद्वारे हूंकारजं द्विभुजं विश्वाम्भोजसूर्य्याप्रत्यालीढस्थं रक्तं पद्माङ्कुशधरं शूरङ्गमसमाधिस्वभावं त्रैलोक्यप्रसाधकं महाक्रोधराजानं
विभाव्य॥ ॐ आः त्रैलोक्यप्रसाधक महाक्रोधराज हूं। इत्यनेनाष्टोत्तरशतवारमधिष्ठाय पूर्ववत्पश्चिमद्वारं विचिन्तयेत्॥ ३॥ तथैवोत्तर

46 तावत्तुलशीर्षं॥ तदूर्द्ध्वमेकमात्रकेणाष्टांशपद्मं॥ तदूर्द्ध्वं तः शेषं चतुरस्रं॥ तदुपरि शिलीध्रेणाद्य रूपञ्च चत्वारिंशन्मात्रवेणीभयप्रान्तेन॥ तदूर्द्ध्वं य
थाप्रमाणं शिली स्थापनीया॥ तत्र द्वाराणां स्तम्भानां च स्थापनार्थं सर्ज्जरसतैलेन विलिप्य सिन्दुरादिभिरलङ्कारैरलंकृत्य विचित्रवस्त्रादिभिश्चा
लङ्कृत्य प्रियंगुकुसुमकुंकुमदूर्वाकुरबोधिवृक्षदलमलापंचोपहारफलादिकञ्च सज्जीक्रियेत॥ ततो द्वाराणि प्रत्येकं दिक्षु॥ एकत्रिपञ्चसप्त
वा सर्वाणि द्वाराणि स्तम्भाश्च स्वस्वदिग्व्यवस्थितक्रोधराजमन्त्रैः संजप्य स्थापयेत॥ तत्र एकद्वारपक्षे पूर्व्वादिदिक्षु द्वारचतुष्टयानां बीजहूंकार ४ः
तदयमर्थः॥ समाधित्रययोगवान्योगी हूंकारजद्विभुजं धवलवर्णं योगांकुशाकरं श्रीवज्रविजयं महाक्रोधराजानमालीढव्यवस्थितं विमलस
माधिस्वभावं सूर्यस्थं विभाव्य॥ ॐ आः वज्रविजय महाक्रोध हूं इति मन्त्रेणाष्टोत्तरशतवारमधिष्ठाय॥ ततस्तं ज्ञानसत्वमानीयार्घादिकं दत्वा संपूज्य

44 द्वारहूंकारजं द्विभुजं तर्ज्जनीपाशविश्ववज्रधरं सिंह विक्रीडितसमाधिस्वभावं वीरविक्रमं महाक्रोधराजं विभाव्य॥ ॐ आः वीरविक्रम महाक्रोधराज हूं॥
इत्यनेनाष्टोत्तरशतवारमधिष्ठाय पूर्ववदुत्तरद्वारं विचिन्तयेत्॥ तथैवेशान्याग्नेशान्यानानि चतुर्विंशति द्वाराणि हूंकारोत्पन्न वल. विद्रापक. वज्रांकुश
यमान्तक. वज्राशनि. उन्निरीक्ष. टक्किराज. अनन्तचर. वज्रपाश. प्रज्ञान्तक. पद्मान्त. रत्नशिखर. नीलदण्ड. दुर्ज्जयवज्रस्फोट. पद्मान्तक. भीम. प्रचण्ड. महा
बल. पदनिक्षेप. वज्रावेश. अमृतकुण्डलि. वज्राट्टहास. वज्रविदारण रूपाणि द्विभुजानि॥ तर्ज्जनीपाशवामकराणि॥ स्वस्वचिन्हांकितदक्षिणकराणि
नील. पीत. शीत. नील. पीत. शुक्ल. कृष्णागौर. नील. शुक्ल. हरित. पीत. कृष्ण. पीत. रक्त. रक्त. हरित. पीत. नील. श्याम. विश्व. कृष्ण. शुक्ल. हरितवर्णानि ४४
स्वस्वसमाधिस्वभावानि॥ सुवर्णरूप्यमयकलशाद्युगोपरि स्थापयेत॥ तत्राचलसमाधिष्ठानवज्रसमाधिस्वभावः॥ तस्य प्रहरणं खड्ग॥ ॐ आः

89 अचलमहाक्रोधराज हूं।।सत्वाधिष्ठानसमाधि।। विघ्नापको महासमयसम्भवसमाधिस्वभाव।।तस्य प्रहरणं ध्वज।।ॐ आः विघ्नापकमहाक्रोधराज
हूं।। २ ।।वज्राङ्कुशः समयाङ्कुश समाधिस्वभावः।।तस्य प्रहरणमङ्कुशः।।ॐ आः वज्राङ्कुश महाक्रोधराज हूं।। ३ ।। यमान्तकः सर्वतथागतसन्तोषणा
समाधिस्वभावः।।तस्य प्रहरणं विश्ववज्रमुद्गरः।।ॐ आः यमान्तक महाक्रोधराज हूं।। ४ ।।वज्राशनिवज्रपारमिताधिष्ठानस्वभावः।।तस्य प्रहरणं व
ज्र।।ॐ आः वज्राशनि महाक्रोधराज हूं।। ५ ।।दुर्निरीक्षः सर्वप्रभामण्डलाधिष्ठान समाधिस्वभाव तस्य प्रहरणं चक्रं।।ॐ आः दुर्निरीक्षः महा
क्रोधराज हूं।। टक्किराजः सर्वतथागताकर्षणासमयसमाधिस्वभावस्तस्य प्रहरणमङ्कुशः।।ॐ टक्कि महाक्रोधराज हूं।।अनन्तचरो [illegible]ाधिष्ठा
न वज्रसमाधिस्वभावस्तस्य प्रहरणं परशु।।ॐ आः अनन्तचर महाक्रोधराज हूं।। २ ।।वज्रपाशः समयप्रवेशसमाधिस्वभावस्तस्य प्रहरणं वज्र

91 स्तस्य प्रहरणं करालवज्र।।ॐ आः प्रचण्ड महाक्रोधराज हूं।। ।।महाबलः कर्माधिष्ठान समाधिस्वभावस्तस्य प्रहरणं विशूलः।।ॐ आः महाबल महाक्रो
धराज हूं।। ।।पदनिक्षेपो वाग्वज्रसमाधिस्वभावस्तस्य प्रहरणं धनुःशरः।।ॐ आः पदनिक्षेप महाक्रोधराज हूं २।।वज्रावेशः समयावेशसमाधिस्वभाव
स्तस्य प्रहरणं वज्रघण्टा।।ॐ आः वज्रावेश महाक्रोधराज हूं।। ३ अमृतकुण्डलिरमोघवज्रसमाधिस्वभावस्तस्य प्रहरणं वज्र।।ॐ आः अमृतकुण्डलि
वज्र महाक्रोधराज हूं।। ४ वज्राट्टहासो हूंकारवज्रसमाधिस्वभावस्तस्य प्रहरणं खड्गः।।ॐ आः वज्राट्टहास महाक्रोधराज हूं ५।।वज्रविदारणो मारबल
प्रमर्दनसमाधिस्वभावस्तस्य प्रहरणं मकरमुखिकवज्र।।ॐ आः वज्रविदारण महाक्रोधराज हूं।। ६ ।।शेषाणि पूर्ववत्।। ।।स्तम्भो रत्नशीला पवि
स्थाप्याः।।तत्र पूर्वस्यां दिशि त्रिपञ्चसप्तकुमारिकाणां चतुःस्तम्भयुगलानि चत्वारि सम्यक् प्रहरणानि।। ३ ।।षट्पारमितास्वभावानि षट्स्तम्भयुगला

90 पाशः॥ ॐ आः वज्रपाश महाक्रोधराज हूँ॥ ३॥ प्रज्ञान्तको मशरीरत्नवज्रसमाधिस्वभावत्वस्य प्रहरणं वज्राङ्कितदण्डः॥ ॐ आः प्रज्ञान्तक महाक्रोधराज
हूँ॥ पलालउच्छ्रियोधिष्ठानसमाधिस्वभावत्वस्य प्रहरणं मुद्गरः॥ ॐ आः पलाल महाक्रोधराज हूँ॥ २ रत्नशिखरः प्रीतिसम्भवसमाधिस्वभावनस्य
प्रहरणं अङ्कुशः॥ ॐ आः रत्नशिखर महाक्रोधराज हूँ॥ नीलदण्डो ज्ञानवज्रसमाधिस्वभावत्वस्य प्रहरणं दण्डः॥ ॐ आः नीलदण्ड महाक्रोधराज
हूँ॥ २॥ दुर्ज्जयो धर्म्मताधिष्ठानसमाधिस्वभावत्वस्य प्रहरणं कुन्तः॥ ॐ आः दुर्ज्जय महाक्रोधराज हूँ॥ २ वज्रस्फोटः समयस्फोटसमाधिस्वभावत्वस्य
प्रहरणं शृङ्खलाः॥ ॐ आः वज्रस्फोट महाक्रोधराज हूँ॥ ३॥ पद्मान्तको धर्म्मचक्रप्रवर्त्तनसमाधिस्वभावत्वस्य प्रहरणं पद्मं॥ ॐ आः पद्मान्तक महा
क्रोधराज हूँ ४॥ भीमो दुःखच्छेदनसमाधिस्वभावत्वस्य प्रहरणं खड्गः॥ ॐ आः भीम महाक्रोधराज हूँ ५॥ प्रचण्डः सुप्रतिष्ठितसमाधिस्वभाव ८५

92 नि॥ ४॥ चत्वारि संग्रहवस्तुः चतुर्ब्रह्मविहारस्वभावान्यष्टस्तम्भयुगलान्यधिमुच्य स्वस्वदिगवस्थितक्रोधमन्त्रैरधिष्ठितानि हूँकारबीजोद्भूतानि स्थापयेत्॥
१॥ स्वेदक्षिणस्यां चत्वारि स्मृत्युपस्थानस्वभावानि॥ २॥ षट्कन्यस्वभावानि॥ ४॥ चतुःसत्यचत्वारिध्यानानि॥ १॥ तथा पश्चिमायां चत्वारि ऋद्धिपादाः॥ २
षडभिज्ञास्वभावानि॥ ४॥ चतुर्वैशारद्यचतुःप्रतिशरणा॥ १॥ तथैवोत्तरस्यां चत्वारि अतिसंविन्स्वभावानि॥ ३॥ षडनुस्मृतिस्वभावानि॥ ४॥ आर्याष्टाङ्गमार्ग
स्वभावानि॥ १॥ ततो द्वारशिरस्तम्भाश्च समेईष्टकापङ्क्तिसमेष्ववस्थापयेत्॥ स्तम्भोपरि शिलीधराः स्थाप्या॥ शिलीनामुपरि शिलीसमभिन्नपरिवा
नागवलयाबाहारपट्टिकावा॥ तदुपरि सिंहमुखान्यघटितं घटितं वा नरद्वयसमुत्कर्षकानि॥ तदुपरि ईष्टकाविरचितस्थाना तदुपरि ग्रीवा॥ यदा तु सर्वाणीष्टका ८६
मयानि॥ तदा शिलीनामुपरि सुवर्णपट्टो॥ तदुपरि पद्मपत्राणि॥ तस्योपरि स्थानानां तदुपरि काण्ठकानि॥ बर्हिपिण्डकावेदिकार्द्धप्रमाणा॥ नर्येण॥ ततो

93 द्वारस्थापनानन्तरमग्निपूजामाह॥ तत्र मूर्द्धादिशितनीलपीतारुणश्यामाङ्गकृष्णामृगाजिननिवसने· विभूषणाः शान्तहृच्छ्रयटोपेवरदाक्षकराडोकेत्रिद
राडसवृत्तसूत्रविश्वांवरधरैकमलस्थसूर्यासनसूर्यप्रभेमहातापसाग्नौ होमङ्कुर्यात्॥ ॐ तापसाग्नेयेस्वाहा॥ ॥ततो यथास्थाने इष्टकासमेधरणि॥ का
ष्ठरुयुग्मंस्थापयेत्॥ मध्यवेधं शल्यवेधं न स्थाप्या॥ ततो गवाक्षलक्षणमभिधीयते॥ तत्र द्वारत्रिभागैकभागेन गवाक्षमध्यं कैकटकञ्च। नवमानकेन देह
लीविंशतिमानकेन निर्यूह॥ चतुर्दशमानकेन पल्लविता॥ तस्योर्ध्व सार्द्धचतुर्मानकः॥ अष्टमानकेन वाहली॥ सार्द्धचतुर्मानकेन निर्यूहः॥ अष्टाविंशति
मानकेन पल्लवः॥ षण्मानकस्तस्योर्ध्ववेधः॥ सार्द्धचतुर्मानकेन वाजुः॥ सार्द्धैकरोपमानके वाजुः॥ सार्द्धत्रिमानकेन स्तम्भः॥ तस्योर्द्धमानकेन मेटकदारुः॥
सार्द्धद्विमानकेन वाह्याभ्यन्तरस्तम्भोभ्यन्तरदारुः॥ सार्द्धचतुर्मानकेन शाखा॥ देहलीवाहली च परिमराउनीयं॥ तस्योपरि अनुकर्षकानि॥ विद्याधरशालभञ्जिका

95 कुरुकुल्लाधारणीजाङ्गुलीधारणीमभिलिप्य सुवर्णलिप्य घटितपद्मोपरि संस्थाप्य॥ तदुपरि शुभतिथौ शुभनक्षत्रे मृगशिरधनिष्ठचित्रनक्षत्रे अस्तानप
ल्लवसमये। खंकारजविश्ववज्ररूपं शिरोदारुकं विभाव्य॥ श्रीमदुष्णीषचक्रवर्तिमन्त्रेणाष्टोत्तरशतवारं संजप्य पूजां कृत्वा संस्थाप्य स्वस्वदिक्तथागत
कलशजलैरभिषिञ्च्य विचित्रच्छत्रांबरपल्लवैरलंकृत्य विविधालङ्कारविभूषितं शिरोधीकरपल्लवं ताम्रलोहेश्च संरक्ष्यः॥ वज्रवज्रधरायासहितेन स्वस्व
दिक्पति तथागतमन्त्रेणाष्टोत्तरशतवारं संजप्य सतोक्षरेणादरीकुर्यात्॥ ॥नमः समन्तबुद्धानां ॐ महाप्रत्यङ्गिरोष्णीषचक्रवर्तिसर्वयन्त्रमन्त्रबन्ध
इन्द्रभुवनं बन्ध वृक्षदेवबन्ध धारय इह वासिनां येन केनचिद्वयादिकं छिन्द २ भिन्द २ चिरि २ तिरि २ मिरि २ हूं २ फट् २ स्वाहा॥ अयमुष्णीषचक्रवर्तिनो म
न्त्रः॥ ॥तत्र कुरुकुल्लाधारणीमन्त्रः॥ नमो रत्नत्रयाय नमः सर्वबुद्धबोधिसत्वेभ्यो नमो ऽष्टमहाकार्यपुद्गलायनमः सत्वेभ्यः सम्यक्संबुद्धेभ्यः॥ तद्यथा॥ ॐ

94 दिनानांलंकारविभूषणाानियथाशोभंकार्य्याः॥ नत्रैवरूपंगवाक्षंत्रिपंचसप्ताक्षंवाईष्टकासमेविसमेवास्थाप्या॥ सहूर्द्धयथास्थानेधरणिकायुग्ममिष्टका
विसमेषुस्थापनीयाः॥ यदात्रिगवाक्षानितदाशून्यप्तानिमित्ताप्रणिहितस्वभावानि॥ यदापञ्चतदादिव्यचक्षुःप्रज्ञाचक्षुर्द्धमंचक्षुज्ञानचक्षुवुद्धचक्षुःस्वभाव
नि॥ यदासप्ततदासप्तसम्वोध्यङ्गःस्वभावानि॥ ० ॥ततआग्नेयादिकोणगृहेषुचतस्रोधरणीभूमेदारवोऽभ्यन्तरकोणोपरिधरणिकानामधःस्थापनी
याः॥ कणिडकाद्वयेपिनंद्यावर्त्तकेमेण॥ ततऊर्द्धधरणिकानामुपरिवाह्याभ्यन्तरभित्तिकासमेप्रान्तस्थूनाद्वितयंस्थापयेत्॥ तयोर्मध्येमध्यस्थूनांस्थापयेत्
प्रान्तस्थूनामध्यस्थूनयोर्मध्येपार्श्वस्थूनाद्वयंस्थाप्या॥ मध्यस्थूनोपरियथास्थानेस्तम्भानिस्थापयेत्॥ पार्श्वस्थूनायामुपरिस्वस्वस्थानेवलवाङ्का
निस्थापयेत्॥ वलवाङ्कानामुपरिवलधरदारुद्वयंस्थापयेत्॥ तत्रप्रासादाशिखरोपरिदक्षिणोत्तरशिखरयोर्द्धनजनविवर्द्धयेविघ्नोपहरणायच॥ ५७

96 ह्रीं ह्रीं ह्रीं सर्वनागानांअनन्तकुलानांशंखपालकुलानांकर्कोटककुलानां। पद्मकुलानां। महापद्मकुलानां। कुलिककुलानां। वलाहककुलानां। पुण्डरीक
कुलानां। घनककुलानां। मेघकुलानां। जलधरकुलानां। जीमूतकुलानां। वसन्तकुलानां। ऐरावतकुलानां। कुमुदकुलानां। कह्लारकुलानां। सौगन्धि
ककुलानां॥ हन२ शरेणवन्ध२ चापेण ताडय२ उत्पलेन। भीतानामभयंदेहि। प्रलयकालस्थवजलधरमवतारयवर्षणंनागान्वसीकुरु फुः कुरु२ फुः
कारापय२ फुः२ ॐ कुरुकुल्ले ह्रीः हूं फट् स्वाहा॥ नमोरत्नत्रयाय तद्यथा ॐ इलिमित्ते तिलिमित्ते। इलितिलिमित्ते। दुम्वे। दुम्वालीये। दुस्से दुस्सालीये तर्क्के
तर्क्करणे मर्म्मे मर्म्मरणे कस्मीरे कस्मीरमुक्ते अघे अघने अघनाघने इलि इली य मिलीय इलिमिलीय अस्याषिये अय्याषिये श्वेत श्वेतनुराज
अनन्तरक्षे स्वाहा॥ ॥ ॐ अग्निजिह्वे भूलजिह्वे वज्रकायाग्रस२ ज्वल२ महाज्वाले महायोगेश्वरि हं हूं फट्२ स्वाहा॥ इतिनागमालधारणी॥ ० ॥ ५८

97 ततः फलाभिषेकं कुर्यात्॥ ततो देवता अप्यायनार्थं होमेन तामाग्नि सन्तर्प्पयेत्॥ पद्मासूर्यो परि पद्मारूढा॥ वर्णोच्चतुर्भुजे पाशांकुशं दण्डकुण्डिका॥ भृतिस
त्वानुग्रहकारके॥ अर्क्ककाष्ठसमिद्भिः पूर्वद्वीप्यादिकं जुहुयात्॥ ॐ अमृताग्नये स्वाहा॥ त्रिनाडीविशुद्ध्या शिरोदारु वलधरदारवः॥ पंचनाडीविशुद्ध्या पंचस्थूना॥
अनेकनाडीस्वभावाः॥ शेषदारवो ज्ञेया॥ तत्र शिरोदारुणामुपरि गृहाछादनदारवः स्थाप्या॥ प्रासादशिखरोच्छ्रयस्यार्द्धाधिकत्रिगुणप्रमाणां चतुर्गुणप्रमाणा वा गृ
हाछादनदारुणामायामः॥ वज्रशरजालस्वभावानि॥ ॐ वज्रशरजाल त्वां॥ तेषां मूर्द्धे शिखादारवः स्थापयेत्॥ प्रधाननाडीस्वभावं॥ ॐ वज्ररक्ष हूं॥ इति मन्त्रेण॥
ष्टोत्तरशतवारं परिजपेत्॥ ग्रन्थविस्तरभयान्नोक्तान्यन्यदारुकर्म्माणि॥ ॥इति श्रीमहापण्डितकुलदत्तविरचितायां पंजिकायां पञ्चमप्रकरणं॥ ॥
वज्राचार्य्या प्रवेशोऽस्मि समाधित्रयभावना॥ परिक्रमार्थसूत्राणां पातनं महाहोमपि॥ अग्निक्रियाविधानञ्च पिण्डिकास्थापनं ततः॥ सद्वक्षरोन्ननिष्पाद्य

99 क्रोधी भव वज्रबन्ध हूं॥ अनेनैन॥ ॐ हन २ वज्रक्रोध हूं हृदि॥ अनेनैनच॥ ॐ आः हूं शोधय रक्ष २ हूं २ हृदि॥ अनेनैनच मन्त्रेण हस्तं दत्वाऽधितिष्ठेत्॥ ततः भ्यान्न भूमिशोधनं॥ ॥
ततः सत्वपर्यङ्कनिषण्ण आत्मानं हर्षयेत्॥ अद्य मे सफलं जन्म सफलं जीवितं च मे॥ समः समयबुद्धानां भवितास्मि न संशयः॥ अद्यैव नर्त्यो भविष्यामि बोधिसत्वैकचेतनः॥
तथागतकुलोत्पत्तिर्मम माद्य स्यान्न संशयः॥ अग्रो मे दिवसो ह्यद्य यत्तो मे यत्तुत्तरः॥ सन्निपातो ह्यमेऽग्रः सर्वबुद्धानिमन्त्रणात्॥ ॥सर्वाङ्गेन प्रणम्य॥ हूं जः वज्र
जिह्वः सर्वबुद्धानिमन्त्रयेत्॥ समन्वाहरन्तु मां बुद्धा अशेषा दिक्षु संस्थिताः॥ इहाहं मण्डको वज्री वर्त्तयिष्यामि मण्डलं॥ आयान्तु सर्वबुद्धाश्च सिद्धिमे नाप्रदास्य
थेति॥ ततस्तु नभः स्थै रक्षोभ्यादिचतुर्भिः पूर्वादिदिग्व्यवस्थितैः॥ शिष्यैः स्वस्वचक्रवर्त्तित्यागवद्धियोगं वज्रघण्टयावारिभिरेकेनापि वा शिष्येनातुक्रमेनतस्ल च नमत्र ग
ताध्येषयेत्॥ सर्वतथागतानां शान्तं सर्वतथागतलयं॥ सर्वधर्मागतैरात्म्यं देश मण्डलमुत्तमं॥ १ ॥सर्वलक्षणसंपूर्णं सर्वालक्षणवर्जितं॥ समन्तभ

98 प्रतिमांस्थापयेत्ततः॥तत्रविहारप्रतिमागरिडकापिरिडकाभिकराडादीन्नि ध्यायपूर्वोक्तक्रमेण॥चार्य मध्येष्य प्रदोषे शान्तिकहोमंकृत्वा शुभतिथिनक्षत्र
मुहूर्त्तेषुमराडललिखनाद्यर्थंनिविघ्नायचस्वस्वगृहे कृतदेवतायोगंश्राद्धेनदानपतीनादत्तवस्त्राभरणताम्बूलदक्षिणादिकंपंचोपहारपूजापुरःसरं।
वस्त्रमकुटमलङ्कारविशेषैरलंकृत्यवज्रवज्रघरायधारिणां।त्रैलोक्यविजयाहङ्कारेणास्वगृहाद्बहिर्गत्वा वज्रपदेनतन्त्यंकृत्वामार्गेषु चंदनवलिकंस्वस्व
स्थानस्थितानांदेवनागयक्षादीनांचपूजासमयेतत्तन्मुद्रांप्रदर्शयन्तंस्वस्वमन्त्रैःपूजांकुर्वन्तंअष्टतालास्यादिभिश्च॥महामराडलगृहमीशानकोणतःप्रवेशये ४९
त्॥इतिवज्राचार्यप्रवेशः॥ ॥तदनुसमाधित्रयभावनार्थंदेवतायोगोविधेयः॥ॐस्वभावशुद्धाःसर्वधर्माःस्वभावशुद्धोहं॥नैरात्म्याधिमोक्षमध्या
त्मिकंस्नानंकृत्वा॥ ततःसुगन्धजलेनमराडलभूमिमभिप्राक्ष्य॥ॐखःमिति पठन्नाकाशीकुर्यात्॥ततोहूंलंहूँहस्पनेनवज्रमयींविभाव्य॥ॐमेदिनी

100 द्रकायाग्रेभाषमराडलमुत्तमं॥ २ ॥शान्तधर्माग्रसंभूतंज्ञानचर्याविशोधकं॥समन्तभद्रवाचाग्रभाषमराडलमुत्तमं॥ ३ ॥सर्वसत्त्वमहाचित्तंशुद्धप्रकृति
निर्मलं॥समन्तभद्रचित्ताग्रंघोषमराडलसारथे॥ ४ ॥इतिचतसृभिर्गाथाभिर्म्मराडललिखनायाध्येषितः॥एकगाथद्देशः॥तिसृभिर्निर्द्देशः॥मराडलदे
शभाषघोषइतिकथयन्त्यर्थः॥ततोमराडलचक्रादिभिःस्फरणादिपूर्वकंभावितमराडलचक्रंवज्रमुष्टिद्वयस्थतर्ज्जनीद्वयंप्रसार्य्यलग्नाग्रमध्येसुखंधारयन्
हूंवज्रोतिष्ठेतिपठन्नभसिसमुत्थाप्यातिष्ठेत्॥तदनुयमनिकाभ्यन्तरस्थचक्रवर्त्तिरूपमुद्वहन्वस्त्राद्यलंकृतःसमपदंस्थित्वायमनिकामपनयन्क्रमेण॥
मकुललाटोरिष्टुकग्रीवास्कन्धबाहुहृदयनाभिकटिजानुचरणान्दर्शयन्प्रमुदितान्दम्भूमीनामावरणाविघट्टयामीतिस्वनावज्रीनिश्चरति॥ततोमूर्द्धिपु ५०
ष्पपूर्णाञ्जलिनाॐप्रणामामिसर्वतथागतानितिप्रणामेत्॥ततोहृदयसंपुटाञ्जलिंमारायाः॥ॐसर्वतथागतेभ्यःआत्मानंनिर्यातयामीतिनिर्यात्य॥या

101 वन्तः सर्वसत्त्वाः सत्त्वसंग्रहेण संगृहीता॥ अण्डजा वा जरायुजा वा संस्वेदजा वा उपपादुका वा रूपिणो वा अरूपिणो वा संज्ञिनो वा असंज्ञिनो वा नैवसंज्ञिनो वा सर्वे ते मत्व
मया महासमुद्रापदे प्रतिस्थापयितव्या इति कृत्वा प्रणिधिः॥ अविद्यान्धकारपरिगतान् सत्त्वान् मारैरधिष्ठितानभिषिक्ष्य माराणानुत्सारयितुं भृकुटिनिः क्रान्तहूँकारमूर्त्तिः क्रोधवशा
त् भ्रान्तभ्रुकुटीदंष्ट्रालरसनाग्रे यञ्च षडादिमान मकारेण सूर्याक्रान्तसव्यमनेत्र॥ टकारेण चन्द्राक्रान्तवामनेत्रः ॐ क्रोधदृष्टि ह्रीःरिति हूँकारेण कल्पान्तवह्नीक्रेनाभयमारा
नया वज्रप्रश्वास सर्वासु दिक्षु जगद्वीक्षेणा हूँकारं स्फोटयेत्॥ अहमेव स्वयं वज्री वज्रसत्त्वोस्मि हूँ स्वयं॥ अहं बुद्धो महाराजा अहं वज्री महाबलः॥ अहं योगीश्वरो रा
जा वज्रपाणिरहं दृढधर्ममिति॥ सविभ्रमविमला साग्रवज्रान्त्रील ननन्तरः॥ ऐशान्यां दिगमारभ्य साहंकारं परिभ्रमेत्॥ १ ॥ एवं सर्वोत्तरसाधका अपि परिभ्रमे
युः॥ किंतु पूर्वदिगवस्थितउत्तरसाधकः॥ एकसूचिकवज्रपदं हूँकारजं पादतलं विचिन्त्य॥ दक्षिणचरणेन पृष्ठेऽग्रे नैव वामचरणेन भ्रमीं चाकारयन्॥ ॐ एक

103 प्रयोजकः॥ वज्रेणादीप्तचपषास्फालयोगि त्रिकायजान॥ लंघयेद्यदि कश्चिन्नेवि विशीर्य्येनात्र शंषयः॥ इत्युच्चारयन् स्फारितानलक्रोधैर्विघ्नानुत्सारयेत्॥ मण्डल
भुवं चारसानलहूँजः वज्रमयीमधितिष्ठेत्॥ ॥ तथैव पश्चिमदिग्वस्थित उत्तरसाधकः हूँजः पञ्चसूचिकवज्रंपादतलं विचिन्त्य भ्रमीं चाकारयन् मंत्रं पठन् परि
क्रमेत्॥ ॐ पञ्चसूचिकवज्रपदवज्रमहाक्रोधभंजर सर्वदुष्टासुरान् हूँ फट्॥ अपसरंतु भवंतो ये केचिद्देवासुरनागयक्षमहोरगा अपस्मारभूतभूतिन्यः पिशाच
गुह्यगन्धर्वकिंनरोन्मारककटपूतनमातृचरमहल्लकमहल्लिकाश्च॥ अन्येपि ये के पृथिवीतले अस्मिन्निवसन्तो भवन्तः शृण्वन्तु॥ अहममुकनामाचार्यः॥ अ
मुकनामानं मण्डलमावर्त्तयिष्यामि॥ अमुकशिष्यस्याभिसंबोधिपरिपूरणार्थं॥ अतोऽस्मान्मया शांस्तु त्वाशीघ्रमेवापक्रमितव्यं॥ योनापक्रमेत्॥ तस्य वज्रपाणि
ज्वलितशतक्लिरणावज्रेणामूर्द्ध्नि शतधा विकिरेत्॥ इति पठन् स्फारितानलक्रोधैर्विघ्नानुत्सारयेत्॥ मण्डलभूमिं चारसानलहूँज वज्रीमयीमधितिष्ठेत्॥ ॥

102 सूचिकवज्रपदवज्रमहाक्रोधभंजर२ सर्वदुष्टासुरान् हूं फट्॥ अपसरंतु भवंतो त्यके चिद्देवासुरयक्षराक्षसप्रेतपिशाचापस्मारभूतअक डाकिन्योत्सारकमहस्वक महाव्वि
का अत्र चरपरिषद्गहुण्ढिं नरमेत्रसिद्धा अत्र पृथिवीप्रदेशे अमुकनमया अमुकस्य दानपतेरभिसंबोधिपरिपूरणार्थे सर्वसत्वानतरज्ञानलाभहेतो श्रीअमुकमण्डल
मालिखितव्यन्तदेतां महावज्रधराज्ञां श्रुत्वा शीघ्रमेवापक्रमति तस्याहमनेन प्रज्वलित हूंकारेणादीप्तप्रदीप्तेन महानाज्ञानवज्रेणामूर्द्धानं सतत्राविकरामी। ते पठतस्फा
रितानन्तक्रोधैर्विघ्नानुत्सारयेत्॥ मण्डलभुवं चारसातले हूं जः वज्रमयीमधितिष्ठेत्॥ ॥तथा दक्षिणादिग्वास्थित उत्तरसाधकः त्रिसूचिकवज्रं हूंकारेणापादतलेत्र ५१
चिंत्य भूमौ एकारयन्मन्त्रं पठन् परिक्रमेत् मन्त्रः॥ ॐ त्रिसूचिकवज्रपदवज्रमहाक्रोध भंजर२ सर्वदुष्टासुरान् हूं फट्॥ अपसरंतु भवन्तो ये केचित् स्थानवासिनः॥
नागयक्षादिगन्धर्वभूतभूतिनि डाकिनी सत्वार्थक्रियारम्भे गच्छध्वं शीघ्रमेवतु॥ श्रावन्तु सर्वविघ्नौघाः कायवाक्चित्तसंस्थिता॥ अहम्वज्रधरः श्रीमानाज्ञाचक्र

104 एवमुत्तरदिशावास्थित उत्तरसाधकः पादतले अः कारजः विश्ववज्रं विचिंत्य भूमौ परावृत्य दक्षिणापादेन दक्षिणोऽग्रे चाकारयन्॥ वामपादेन पृष्ठे वामपार्श्वे वाका
रयनन्त्यभ्रमणायोगेन च मंत्र मूच्चारयन परिक्रमेत्॥ ॐ विश्ववज्रपदवज्रमहाक्रोधभंजर२ सर्वदुष्टासुरान् हूं फट्॥ अपसरंतु महाविघ्ना ये केचित्कटपूतनाः॥ म
हासुखज्ञानसंभूता वज्रसत्वस्वभावजा॥ अहंकरुणावलः श्रीमान् रक्षाचक्रप्रयोजकः॥ वज्रेणादीप्तवपुषा स्फालयामि त्रिकायजान्॥ लंघयेयदि कश्चिन्मे विशी
र्यदत्र नान्यथेति पठन् स्फारितानन्तक्रोधैर्विघ्नानुत्सारयेत्॥ मण्डलं भुवं चारसातल हूं जः विश्ववज्रमयीमधितिष्ठेत्॥ ॥अत्र च भ्रमणासमये प्रतिद्वार ५२
मात्मनो वामस्थितशिष्यः घण्टामध्ये वज्रं प्रवेशयेद्वज्रं चात्म घण्टया॥ ॐ खवज्रधृक वज्र हूंकार वज्र हूं फट्॥ ॥इदानीं पदसाधनमुच्यते॥ तत्र प्रधानाचार्य
ःक्रमपदेनृत्य पूर्वकं पूर्वस्यां दिशि वज्रांकुशक्रोधाहंकारेण हूंकारेणादयन्॥ वज्रांकुशामुद्रायुक्तेन वामजंघामाकुंच्य पंचवितस्त्यन्तरेण दक्षिणजंघा प्रसार्य मन्त्रश्च

105 पठन् आलीढ नाम स्थानकं स्यात्॥ ॐ आलीढपद वज्र महाक्रोध विघूर्णाय २ सर्वदुष्टदेवानि मारान् हूं फट्॥ १ ॥ तथैव याम्या वज्रपाश हंकारेणान्तु द्वाग्रकेन दक्षि
णजंघामाकुंच्य वामजंघा पंच विस्तर्यन्तरेण हूंकारनादयन् प्रसार्य्यन्॥ प्रत्यालिढस्थानकं स्यात्॥ मन्त्रः॥ ॐ प्रत्यालीढपद वज्र महाक्रोध विघूर्णाय २ सर्वदुष्टयमादि
मारान् हूं फट्॥ २ ॥ तथैव वारुण्यां वज्रस्फोटा हंकारेणानन्ध जानुद्वयं कृत्वा षड्दिंश न्यग्गुलान्तरेण मनाक्षिर्यकयक्षावद्वयं सर्वेष्प वज्रमुलालयेन्॥ वैशाख प
दं नाम स्थानकं स्यात्॥ मन्त्रः॥ ॐ वैशाखपद वज्र महाक्रोध वि घूर्णाय २ सर्वदुष्टनागादि मारान् हूं फट्॥ ३ ॥ तथैव कौवेर्या वज्रावेश॥ हंकारेण जंघा द्वय
माकुंच्य निर्यग्रुल्लद्वय मायामहन्सपक्ष वदुन्नाम्य घराठोवादयन्॥ मण्डलपदं नाम स्थानकं स्यात्॥ मन्त्रः॥ ॐ मण्डलपद वज्र महाक्रोध विघूर्णाय २ सर्वदुष्ट
यक्षादि मारान् हूं फट्॥ ४ ॥ तथैव मध्ये वज्रसत्त्वा हंकारेण वज्रसत्त्व महामुद्राश्च वद्धा पाद द्वयाङ्गुष्ठगुल्फाश्लेषान पश्चना हृन्य हृदि करद्वयेन संपुटं

107 खड्ग अंकुश कुन्त भिन्दिपाल चापाभिनयाश्च॥ ११ ॥ प्रत्यालीढेन दशाभिनयाः॥ वज्रक्षेप, वज्रभैरवः महाबलोत्कर्षण, वज्रहसित, वज्रपाश, दण्ड शक्ति
कणय सर प्रक्षेपाश्च॥ १० ॥ वैशाखपदेन षडभिनयाः॥ वज्रोत्कर्षण वज्रविलास, अभय, फलवरद प्रणामाश्च॥ ९ ॥ मण्डलपदेन सप्ताभिनयाः वज्र
नर्तनेन चतुर्मुखाधिष्ठान वज्रकुण्डलि, वज्रघण्टारणित, चक्र, पद्म, शरोत्कर्षणाभिनयाश्च॥ ७ ॥ समपदेन पंचाभिनयाः॥ वज्रस्फोट, वज्रज्वलित, वज्रवे
ताली, मुषल, पताकाश्च॥ ६ ॥ कूर्मपदेन वज्रसत्त्वाभिनयः॥ १ ॥ एकपदेन द्वयाभिनयौ॥ गर्वी द्वयं भ्रमरीजालश्च॥ २ ॥ तत्र प्रत्येकं विभज्य
न्ते। वज्रमुष्टिद्वयं वद्धा कनिष्ठाद्वयं शृंखलाकारेण संयोज्य तर्जनी द्वयं सूची कृत्य पराङ्मुखस्याग्रतो धारयेत्॥ हस्तपादाभ्यां कूर्माभिनयाः तपर्तेरिति
वज्रसत्त्वस्य कराडाभिनयः॥ वज्रसत्त्वक्रोधा हंकारेण कर्त्तव्यः॥ मन्त्रः॥ ॐ वज्रतराडाभिनय वज्र महाक्रोध कामय २ सर्वविघ्नान् हूं फट्॥ सर्वभावस्वभाव

106 जलिंचकृत्वासर्वतथागतानांनमस्कृत्य समपदंनामस्थानकंस्यात्॥मन्त्रः॥ॐ समपदवज्रमहाक्रोधविघूर्णय२ सर्वदुष्टान्धातुकावास्थितसर्वमारान् हूं फट्॥ १ ॥
तथैवावोवज्रपातालाहंकारेणोवन्धंकृत्वावज्रवन्धमुद्रायुक्तेन दक्षिणाचरणेनवामपादमाक्रम्यकूर्म्मपदंनामस्थानकंस्यात्॥मन्त्रः॥ॐ कूर्म्मपदवज्रमहाक्रोधक्रा
मय२ सर्व्वपातालवासिन्यादिमारान् हूं फट्॥ ६ ॥तथैवोर्द्धमुष्णीषचक्रवर्त्योहंकारेण शिरसिसंपूर्णांजलिंकृत्वावामचरणे समंकृत्वादक्षिणाचरणांवामोरून्यस्यपरि
भ्रमेत्॥एकपदंनामस्थानकंस्यात्॥मन्त्रः॥ॐ एकपदवज्रमहाक्रोधकंपय२सर्व्वडुष्टान्तरीक्षचरादिमारान् हूं फट्॥ ७ ॥एतान्यालीढादिसप्तपदानि चतुर्भिरप्यु ५३
तरसाधकैःकर्त्तव्यानि॥ततोवज्रपदमृत्युपूर्वकं घराणवादयन्वज्रोल्लीलनंचकृत्वा ऐशानीदिशमारभ्यप्राक्शिखिदक्षिणानिशिचरनागमेरुयक्षादउर्द्धादध्
यथाक्रमंप्रत्येकंद्विचत्वारिसदभिनयोःकर्त्तव्याः॥ ॥तत्रालीढेनैकादशाभिनयाःसिंहपद सिंहविजृम्भिन वज्रगुञ्जर स्त्रीमायाकरण वज्रस्फोटन वज्रदंष्ट्र

108 स्थिरचलसर्व्वव्यापिसर्व्वदेवतासमयनाथवज्रसत्वाभिनयः॥ १ ॥वैशाखपदेनाक्षोभ्याहंकारेण॥नागवन्धकृत्वादक्षिणाकरेणहृयुत्कर्षणान्वज्रोत्कर्षणं॥म
न्त्रः॥ॐवज्रोत्कर्षणाभिनयवज्रमहाक्रोधआकर्षय२ सर्व्वतथागतान् हूं फट्॥ स्कन्धमारविनाशार्थवज्रोत्कर्षणं॥ २ ॥पुनःवैशाखपदेनवज्रकर्म्मक्रोधाहङ्का
रेण॥वज्रमेवसलीलंपरिभ्रामयेत्॥मन्त्रः॥ॐ वज्रविलासाभिनयवज्र महाक्रोधआवेशय२ सर्व्वतथागतान् हूं फट्॥ सर्व्वमारारिमोहनकरायवज्रविलास॥ ३ ॥
एकपदेनक्रोधालास्याहंकारेण॥हस्ताभ्यांतन्यनपद्मांजलिमावध्यसर्व्वांगलीभिः॥कुलनिर्म्माणशालान्॥सगर्व्वलास्याभिनयः॥मन्त्रः॥ॐ गर्व्वाद्वयाभिन ५४
यवज्रमहाक्रोधकंपय२सर्व्वमारान् हूं फट्॥सर्व्वतथागतेतेनोघराणर्थंगवोद्धयं॥ ४ ॥पुनरेकपदेनमहावैरोचनाहंकारेण॥सर्व्वाङ्गुलीभिन्निर्मोचरणान्
हस्तद्वयेप्रसार्य्यसमम्गनःसंव्यावसव्यभ्रमणात्॥मन्त्रः॥ॐ भ्रमणीजालाभिनयवज्रमहाक्रोधभञ्जय२सर्वतीर्थिकान् हूं फट्॥ सर्व्वमारविक्षेपणार्थं

109 भ्रमणीजालं॥ १ ॥आलीढ्यमानका हूंकारेण॥स्ववक्त्रे उरव प्रसारितेन प्रसृतेन वामकरप्रकोष्ठपृष्ठोपरि दक्षिणहस्ते प्रकोष्ठश्लेषात्॥ मन्त्रः॥ॐ सिंहप
दाभिनय वज्रमहाक्रोध स्तम्भय२ सर्व महल्लक महल्लिकादीन् हूँ फट्॥सर्वदुष्टमाराणां मृगवद्बन्धनार्थं सिंहपदः॥ ६ ॥पुनरालीढेन टङ्किणाजा हूंकारेण
नर्थैवाभिनयेन लल्लजिह्वायुक्तेन सर्वासां समन्ततः पृष्ठतोऽवलोकयन्॥मन्त्रः॥ॐ सिंहविजृम्भिताभिनय वज्रमहाक्रोध त्रासय२ सर्व महल्लक महल्लिकादी
न् हूँ फट्॥सर्वतथागतज्ञानसत्वविप्रत्यवलोकनाय सिंहविजृम्भितं॥ ७ ॥समपदेन वज्रस्फोटा हूंकारेण॥हृदयवज्रबन्धस्फोटनात्॥मन्त्रः॥ॐ वज्र
स्फोटाभिनय वज्रमहाक्रोध स्फोटय२ सर्वदुष्टमाराणि हृदयस्फोटनात् वज्रस्फोटः॥ ८ ॥इत्यष्टावभिनयाः प्रधानाचार्यस्य॥ ॥समपदेन प्रज्ञा
न्तका हूंकारेण॥करावस्थावज्रं परिभ्राम्योर्ध्वे सलीलं चालयेत्॥मन्त्रः॥ॐ वज्रोद्दलिताभिनय वज्रमहाक्रोध बन्धय२ सर्वदुष्टान् हूँ फट्॥ ॥अत्र वज्रज्ञानवल

111 नायवज्रवेताली॥ १३ ॥आलीढेन यमान्तका हूंकारेण॥वामवज्रमुष्टिना गृहीतवज्रकीलविघ्नयोपरि विन्यस्य दक्षिणकरेण वज्रमुष्टिना गृहीतवज्रमुद्गर
कोटनात्॥मन्त्रः॥ॐ वज्रमुद्गराभिनय वज्रमहाक्रोध चूर्णय२ सर्वदुष्टयक्षान् हूँ फट्॥तृष्णादिदुःखाकोटनाय वज्रमुद्गरः॥ १४ ॥मण्डलपदेनाक्षोभ्याय हूंका
रेण॥पूर्वादिदिक्षु भूस्पर्शवरदध्यानामयमुद्राश्चतुष्टयं भूम्यतानिमित्ता परिगृहितानभिसंस्कारविमोक्षचतुष्टयभावनात्॥मन्त्रः॥ॐ चतुर्मुखाधिष्ठानाभिनय
वज्रमहाक्रोध आधिनिष्ठय२ सर्वदिक्षु ॐ त्रां ह्रीं अः हूँ हूँ फट्॥ चत्वारिज्ञानादेषु सर्वसत्वनियोजनाय चतुर्मुखाधिष्ठानं॥ १५॥ पुनर्मण्डलपदेन प्रदक्षिणाभ्रा
मयं नमनक्रमण्डलयोगात् दक्षिणकरेण वज्रं परिभ्रामयन् भूमौ चरणद्वयनिक्षेपात्॥मन्त्रः॥ॐ वज्राम्रमनक्रमण्डल्याभिनय वज्रमहाक्रोध गृह्णवन्ध दह पंचवि
ध्वंसय वज्रेण सर्वान् स्फोटय भिन्दय हृदय हूँ फट्॥देवपुत्रमारप्रहरणार्थं वज्रमण्डलि॥ १६ ॥आलीढेन वज्रलास्या हूंकारेण वज्रनृत्य पूर्वकं सगर्वाद्ध

110 नकार्यीवज्राञ्जलिनं॥ ९ ॥प्रत्यालीढेन वज्रपाणेर्हुंकारेण॥ पंचसूचिकवज्रमहारागाभिरागात्प्रहारं दण्डान्॥ मन्त्रः॥ ॐ वज्रक्षेपाभिनय वज्रमहाक्रोध आक्षेप
य सर्वभूतान् हूं फट्॥ सर्वतथागतज्ञानवज्रेण सर्वविघ्ननिकृन्तनार्थे वज्रक्षेपः॥ १० ॥मण्डलपदेन वज्रनत्या हुंकारेण· वज्रमुष्टिद्वयेन यथावन्नतेणान्॥ प्रसा
र्य वामभुजमूल दक्षिणहस्तस्थाप्य॥ वामहस्तं शिरस्युपरि संस्थाप्य॥ अथवा तद्विपरीतेन॥ मन्त्रः॥ ॐ वज्रनतेनाभिनय वज्रमहाक्रोध पातय२ सर्वनागान् हूं फ
ट्॥ सर्वदेवतावनिनयनार्थ वज्रनर्त्तनं॥ ११ ॥प्रत्यालीढेन वज्रभैरवी हुंकारेण॥ वक्त्रा हृत्क्रोधः॥ करो प्रसार्य्य॥ विवृत्तास्य नासिका पूट कर्यो ललनत्राणाभया ५५
वहान्॥ मन्त्रः॥ ॐ वज्रभैरवाभिनय वज्रमहाक्रोध शोधय२ सर्वतेधातुकान् हूं फट्॥ स्कन्धमारविद्रावणाय वज्रभैरवस्थानं॥ १२ ॥समपदेन वज्रवेताल्या
हुंकारेण हस्तद्वयेन सव्यमादाय मुखे चर्व्वणाभिनयं कुर्यात्॥ मन्त्रः॥ ॐ वज्रवेताल्याभिनय वज्रमहाक्रोध चर्व्वय२ सर्वदुष्टान् हूं फट्॥ चत्वारिमारारि दुष्ट चर्व्वे

112 यवज्रलास्यामुद्रया वाममवनतशिरः कुर्यात्॥ मन्त्रः॥ ॐ स्त्रीमायाकरणाभिनय वज्रमहाक्रोध आनय२ विमर्द्दय२ सर्वकिंनरादीन् हूं फट्॥ सर्वसत्त्वसंसारमाया
रक्षणार्थं स्त्रीमायाकरणं॥ १७ ॥ इति नवाभिनयो पूर्वदिग्व्यवस्थितानाचार्यस्य॥ ॥आलीढेन वज्रस्फोटय हुंकारेण वामहस्तस्थ क्रोधवज्रे सर्वदुष्टान्नत्र भीष्य
दक्षिणहस्ते क्रोधवज्रेण हन्यात्॥ मन्त्रः॥ ॐ वज्रस्फोटनाभिनय वज्रमहाक्रोध आकोटय२ वज्रभूतान् हूं फट्॥ मदमानादि पापस्फोटनाय वज्रस्फोटनं॥ १८ ॥
प्रत्यालीढेन महाबला हुंकारेण हृदि वामकरं त्रिशूलवज्रीकृत्य दक्षिण वज्रमुष्टिदण्डवदुत्क्षिपेत्॥ मन्त्रः॥ ॐ बलोत्कर्षाभिनय वज्रमहाक्रोधाभिनय वज्रमहा ५६
क्रोध छेदय२ भिन्द२ सर्वदुष्टविघ्नविनायकान् हूं फट्॥ क्लेशोपक्लेशच्छेदनात् खड्गं॥ २३ ॥ प्रत्यालीढेन वज्ररागक्रोधा हुंकारेण दक्षिणकरं त्रिशूलकवज्रक्षेपणा
त्॥ मन्त्रः॥ ॐ वज्राभिनय वज्रमहाक्रोध प्रमर्द्दय२ सर्वदुष्टदेवासुरमनुष्यान् हूं फट्॥ सर्वदुष्टमारादीनां वज्रराजस्य बलदर्शनार्थो वज्राभिनय॥ २४ ॥मण्डलप

113 नवज्रहेतुक्रोधाहंकारेण हृदि वज्रमुष्टिद्वयेन कनिष्ठाद्वयं शृंखली॥ तर्जनीद्वयञ्च शेषांगुलीनां अंगुष्ठे शोधयेत्॥ चक्रवन्तुचेत्॥ मन्त्रः॥ ॐ चक्राभिनय वज्रम
हाक्रोध आनय २ सर्वतथागतपर्षन्मण्डलान् हूं फट्॥ अष्टानवनिक्लेशछेदनार्थ चक्राभिनयः॥ २५ ॥इत्यष्टावभिनयाः॥ दक्षिणादिगवस्थिताचार्यस्य॥ सम
पदेन वज्रपाताला हंकारेण हस्तद्वयं वज्रबन्धीकृत्य मुषलग्रहणाभिनयेन प्रकुर्द्दयेत्॥ मन्त्रः॥ ॐ मुषलाभिनय वज्रमहाक्रोध कुट्टय २ सर्वदुष्टविघ्नविनाय
कादीन् हूं फट्॥ सर्वदुष्टकुट्टनाय मुषलाभिनयः॥ २६ ॥पुनः समपदेन वज्रकेतुक्रोधा हंकारेण दक्षिणवज्रमुष्टिना मध्यमातर्जनी मुत्थितं संस्लीलं प्रसार्य
ध्वं धारयेत्॥ मन्त्रः॥ ॐ पताकाभिनय वज्रमहाक्रोध प्रेरय २ सर्वप्रेतान् हूं फट्॥ सर्वदिग्विघ्नमुच्चाटनाय पताकाभिनयः॥ २७ ॥प्रत्यालीढेन वज्रपाश
हंकारेण करद्वयं स्पृष्टसंलग्नं कृत्वा कनिष्ठाद्वयं तर्जनीद्वयञ्च शृंखलीकृत्य हृदि धारयेत्॥ मन्त्रः॥ ॐ पाशाभिनय वज्रमहाक्रोध वन्ध २ सर्वसमयान् हूं फट्॥

115 ३२ ॥वैशाखपदेन वज्रसाधुक्रोधाहंकारेण दक्षिणकराञ्जली प्रसार्य किंचिदाकुञ्चयेत् हृदये॥ मन्त्रः॥ ॐ फलाभिनय वज्रमहाक्रोध प्रह्लादय २ सर्वतथागतान् हूं
फट्॥ अनुत्तरज्ञानफलप्रदर्शनाय फलाभिनयः॥ ३३ ॥आलीढेन वज्रदुर्जयक्रोधाहंकारेण वज्रमुष्टिद्वयेन कुन्तप्रहराभिनयं कुर्यात्॥ मन्त्रः॥ ॐ कुन्ताभिन
य वज्रमहाक्रोध मारय २ सर्वदुष्टमारान् हूं फट्॥ अविद्यादिदृष्टिविध्वंसनाय कुन्ताभिनयः॥ ३४ ॥इति नवाभिनयाः पश्चिमदिग्वस्थिताचार्यः॥ ॥
आलीढेन वज्ररागक्रोधाहंकारेण वामहस्तेन धनुरादाय दक्षिणहस्तेन शरमादाय वामकरेण धारयेत्॥ मन्त्रः॥ ॐ चापाभिनय वज्रमहाक्रोध तर्जय २ सर्व
दुष्टान् हूं फट्॥ प्रज्ञोपायविशुद्ध्यर्थं सर्वसत्वबोधनाय चापग्रहणं॥ ३५ ॥मण्डलपदेन वज्रवानक्रोधा हंकारेण सव्यकरतर्जनीमध्यमाद्वयेन शरोत्कर्षेण
त्॥ वामपूर्वं गृहीतधनुःसु सन्धार्य वामावर्त्तेन कुर्यात्॥ मन्त्रः॥ ॐ शरोत्कर्षणाभिनय वज्रमहाक्रोध देहि २ सर्वसत्वान् हूं फट्॥ अनुत्तरज्ञानाकर्षणार्थ

114 सर्वदुष्टदेवादीनांवन्धनाय पाशाभिनयः॥ २८ ॥मण्डलपदेनवज्रनेत्रक्रोधाहंकारेण संपुटाञ्जलिकृत्वा पद्मवद्विकाशयेत्॥ मन्त्रः॥ॐ पद्माभिनयवज्रमहाक्रोध
विकाशय२ सर्वसत्वपुण्यज्ञानसंभारपरिपूरयहूंफट्॥ सर्वसत्वानांशुविशुद्धधर्मधातुज्ञानविवोनार्थं पद्माभिनयः॥ २९ ॥प्रत्यालीढेन नीलदण्डाहंकारेण दक्षि
णहस्तवज्रमुष्टिमाक्षिप्यदण्डधराभिनयंकृत्वा प्रहारंदयात्॥ मन्त्रः॥ॐ दण्डाभिनयवज्रमहाक्रोधताडय२ सर्वमन्त्रान् हूंफट्॥ विंशतिशिखरसमुन्नतशल्काय
दृष्टिशैलविदारणायदण्डाभिनयः॥ ३० ॥विशाखपदेनवज्ररक्षक्रोधाहंकारेणदक्षिणाकरमभयप्रदानाकारेणधारयेत्॥ मन्त्रः॥ॐ अभयप्रदानाभिनय
वज्रमहाक्रोधप्रतिष्ठ२ सर्वसत्वान् हूंफट्॥ सर्वसत्वधात्वभयप्रतिस्थापनीयाभयप्रदानाभिनयः॥ ३१ ॥आलीढेनवज्राङ्कुशाहंकारेणसव्यकरेण तर्ज्जनीमं ५७
कुशाकारेणाकर्षणाभिनयंकुर्यात्॥ मन्त्रः॥ॐ अंकुशाभिनयवज्रमहाक्रोधआकर्षय२ सर्वबुद्धवोधिसत्वान् हूंफट्॥ सर्वमारहृदयाकर्षणार्थं अंकुशाभिनय

116 सरोत्कर्षाभिनयः॥ ३६ ॥प्रत्यालीढेनवज्रवसंकरक्रोधाहंकारेण पूर्वसन्धितधनुषिवायुवेगेनाकृष्यवायुवत्प्रक्षिपेत्॥ मन्त्रः॥ ॐ सरप्रक्षेपाभिनयवज्रमहा
क्रोधअनुरागयः सर्वसंसारावस्थितसत्वान् हूंफट्॥ सर्वसंसारावस्थितवशीकरणार्थं शरप्रक्षेपाभिनयः॥ ३७ ॥आलीढेनवंदाविद्याहंकारेणवाममुष्टिंहृदि
न्यस्यदक्षिणावज्रमुष्ट्याभिंदिपालपरिभ्रमणयोगेन प्रक्षिपेत्॥ मन्त्रः॥ॐ भिंदिपालाभिनयवज्रमहाक्रोधभ्रामयर भिंदय२ सर्वदुष्टप्रदुष्टविघ्नविनायकान्
हूंफट्॥ सर्वदेवविघ्नप्रसमनायभिंदिपालाभिनयः॥ ३८ ॥विशाखपदेन वज्रगर्भक्रोधाहंकारेणवामहस्तमुत्सङ्गोत्तानंकृत्वा दक्षिणाकरवरदाभिनयात्॥ मन्त्रः
ॐ वरदाभिनयवज्रमहाक्रोधवरदापय२ सर्वसिद्धिहूंफट्॥ सर्वसत्वारोगादिवरदानेनियोजयायवरदाभिनयः॥ ३९ ॥प्रत्यालीढेनवज्रतेजःक्रोधाहंकारेण ५८
वाममुष्टिहृदिमर्जयतद्दक्षिणाकरेणोज्वालनपूर्वकंशक्तिप्रक्षेपात्॥ मन्त्रः॥ॐ शक्त्याभिनयवज्रमहाक्रोधमारय२ सर्वनरकगतिसत्वान् हूंफट्॥ अविद्या

117 दिग्वादशाङ्गप्रणीन्यसमुत्पाद प्रशमनार्थं शक्त्याभिनयः॥ ४० ॥पुनः प्रत्यालीढेन हयग्रीवाहंकारेण वामवज्रमुष्टिना कनयसूत्रं गृहीत्वा दक्षिणहस्तेन नयमूर्ध्वं
स्वेष्टदेवतायोगिनं संस्थाप्य ज्ञानसत्त्व हृदुपरि रश्मि निर्गत मण्डलचक्राकारैराकाशव्यापिभिर्गृहीत कलश छत्र ध्वज पताकाद्यैरभिषिक्तं शिष्यं ध्यात्वा ॥ अभिषेकं महा
वज्रैर्धातुकृतनमस्कृत ॥ ददामि सर्वबुद्धानां त्रिगुह्यालयसंभवं ॥ इति गाथास्वयमुच्चार्य्याचार्यः शिष्यमभिषेचयेत् ॥ इत्याचार्याभिषेकः ॥ ॥ कलशाभिषेकेन कायविशोध
नं ॥ कलशाभिषेकप्राप्तः शिष्यो गुह्याभिषेकं प्रार्थयेत् ॥ त्वं वज्रसत्त्व सुखसाधक सर्वबुद्धान् संबोधिसत्त्व ननया नविशुद्धान् ॥ आरागयस्व रतिमनोज्ञः ॥ महत्सुखेन सं
तत कालचिरशून्यतभावेनेन ॥ आरागयाहि भो विमलचर्यसमन्तमद्रवोधिहि रागसमयांकुलिशेन शुद्धः ॥ अनेनाधिष्ठितो वज्राचार्यो महागुरुः ॥ शिष्यमभिषेचये
त् ॥ स्वमुद्रां वा शिष्यसमर्प्पिता मन्या वा यथालब्धा रूपयौवनमण्डिता प्राप्य पंचकुलिकलापिनी कृत्वा तस्याः पद्मं संसोध्य स्ववज्रमपि ॥ पश्चात्तया सह समापत्तिं

175 संबुद्धाराधनादिकं ॥ स्वयं महासुखो राजा अत्रैव समवस्थितः ॥ भजमोऽस्म महोरितिः ॥ वज्र पद्माधिस्थानं ॥ अङ्गुल्या वज्रधात्वीश्वरी नाडी चालनं ॥ ॐ सर्वतथागतानुरागणा
वज्रस्वभावात्मकोहं ॥ रतिमारभेत् ॥ वज्रपद्मप्रतिष्ठाप्य बोधिचित्तं न चोत्सृजेत् ॥ क्षोभयित्वा तमानन्दं चित्तमुत्पाद्य भावयेत् ॥ यावन्न कुरुते योगी बोधिचित्तविसर्जनं ॥
तावत्प्राप्नोत्यविच्छिन्नं किमप्यानन्दजं सुखं ॥ पतिते बोधिचित्ते तु सर्वसिद्धिनिधानके ॥ मूर्च्छिते स्कन्धविज्ञानके नः सिद्धिरनिन्दिता ॥ खधातुवज्रसंयोगात्संस्पर्शोत्थ महत्सुखं
सुखमुत्पद्यते येनत्परमानन्दकारकं ॥ वीरमानन्दयोर्मध्ये लक्षं वीक्ष दृढं कुरु ॥ कमलासनीमरीवर ठकयोः पीडनस्थाने ॥ वज्रपर्यङ्कनिश्चितं मध्यनजेनमीक्षयेत् ॥
यत्नादुत्पद्यते ज्ञानं ज्ञानं तद्रूपमित्यलं ॥ न रागान्न विरागाच्च मध्यमा नोपलभ्यते ॥ ज्ञानदृष्टिर्यदा योगी सुखं तिष्ठे क्षणेरात्र ॥ प्रहरं वा प्यवेकाहं मासं पक्षं च वत्सरं ॥ कल्पं
कल्पसहस्रं च तिष्ठेत्ज्ञानाभियोगतः ॥ दृष्ट्वा शिष्यसमापन्नं निश्चार्य हृदयाकुरुः ॥ चतस्रो मोहरत्याय तस्याश्चित्ते निवेशयेत् ॥ शिष्यमाकल्पसन्धार्य उत्सृज्य कम

174 रुचामंथ्यमन्थानक्रमेणालक्षंवीक्ष्यशिष्यानामुखंवद्धाअनामिकाङ्गुष्ठाभ्यांवोधिचित्तंशिष्यचक्रेदद्यात्॥इतिगुह्याभिषेकक्रमः॥ ॥गुह्याभिषेकेनवाग्वज्रंविशो
ध्यचित्तवज्रंविशोधनार्थंप्रार्थयेत्॥वोधिवज्रेणेत्यादिगाथया॥ततःपाणौपाणिःप्रदातव्यःशास्त्रोक्तंतथागतात्॥हस्तंदत्वाचशिरसिशिष्यस्यगुरुवज्रिणा॥श्य
नेधारणीरम्यांसेव्यावुद्धैःप्रकाशिता॥चक्रक्रमप्रयोगेणासमाश्वासयसन्मुखं॥नान्योपायेनवुद्धत्वंतस्माद्विद्यामिमाश्वरा॥अद्वयाःसर्व्वधर्म्माःशुद्धयभावेनलक्षि
ता॥तस्याविनियोगःसंसारेणाकार्यीभवतासदा॥इदंतत्सर्ववुद्धानांविद्यावृतमनुत्तरं॥अतिक्रामतियोमूढःसिद्धिस्तस्यनचोत्तमाः॥ततःप्रज्ञावदेत्॥किंत्वमुत्सहसे
वत्सविण्मूत्रादिभक्षणं॥रक्तंशुक्रंतथामांसंस्त्रीणाम्भक्षितंतथापरं॥चुम्बनंभगपद्मस्यइहिवत्सयथासुखमिति॥उपायवदेत्॥किंचाहंनोत्सहेदेविशुक्ररक्तादिभक्ष ८७
णं॥कार्योभक्तिःसदास्त्रीणांचुम्बनम्भवमेवच॥इतिव्रूयात्॥अहोमदीयंपद्मंसर्व्वसौख्यसमन्वितं॥यःसेवतिविधानेनतस्याहमग्रतःस्थिता॥ऊरुपद्मेयथाका

176 लोदरे॥ततोरसनयाचित्तंगृह्णीयात्वोधिपूर्वकं॥इतिप्रज्ञाज्ञानाभिषेकविधि॥ ॥इदानीज्ञानविशेषोधनार्थंयथोक्तविधिनासाक्षाद्गुह्येनप्रज्ञाज्ञानाभिषेकस्ये
वचतुर्थाभिषेकफलभूतमभिषेकरत्नंवक्तव्यं॥नान्यस्यसमयक्षतिभयात्॥अपरमुक्तं॥नाभिषिक्तोहियोयोगीयोगीत्वमभिवाञ्छति॥हन्यतेमुष्टिनाकाशंपिवेन्मृ
गतृष्णिकां॥तस्मात्दत्वाभिषेकविधिभिर्यथोक्तैः॥शिष्याधिमुक्तिंमनसासमीक्ष्य॥उदारगंभीरनयाधिमुक्तैर्व्वाचैवदद्यात्अभिषेकरत्नं॥नान्यस्येति॥ननुकथमव
गन्तव्यं॥अयमुदाराधिमुक्तोनवेति॥यदुक्तं॥धूमेनज्ञायतेवह्निःसलिलंतुवलाकया॥निमित्तैर्ज्ञायतेगोत्रंवोधिसत्त्वस्यधीमतः॥सुप्रसन्नमुखाम्भोजहर्षोत्फुल्लत
नूरुहं॥अनुगृह्णातिशब्दिष्यदृष्ट्वातत्वेनपरिडतइति॥यदुक्तंभगवता॥अभिषेकत्रिधाभिन्नमस्मिंस्तन्त्रेप्रकाशितं॥आचार्य्यगुरुप्रज्ञाचचतुर्थंतत्पुनस्तथेति॥ ८८
हासितक्षणपाणाप्तिस्तत्पुनर्द्वन्द्वतन्त्रके॥आनन्दंपरमंवीरमंसहजंतथा॥विचित्रंप्रथमानन्दःपरमानन्दोविपाकके॥विरमानन्दोविमर्दैचसहजानन्दोविचक्षणैः॥

177 विचित्रविविधख्यातं आलिङ्गनचुंबनादिकं॥विपाकं तद्विपर्यासं सुखज्ञानस्य भुंजनं॥विमर्द्दमालोचनं प्रोक्तं सुखभुक्तं मयेति च॥ विलक्षणं त्रिभ्योऽन्यद्रागारागविवर्ज्जितं॥
अत एवाह॥नरागो न विरागश्च मध्यमा नोपलभ्यते॥त्रयाणां वर्ज्जनादेव सहजं बोधिरुच्यते॥अयमेवार्थः श्रीसमाजेप्युक्तः॥ साध्यसाधनयोर्वज्रप्रवेशपर्यन्तमानन्दः।
अत्यन्तचालनं बोधिचित्तपर्यन्तं परमानन्दः॥च्युतिर्विरमः॥अनयोर्म्मध्ये स्वसुखं शान्तं यदा भवति तदा सहजानन्दसाध्यमित्यर्थः॥अत एवाह॥ आइ ण अन्त ण मज्झ ण
हि णाउ भव णाउ णिव्वाण॥ एहु सो परम महासुह णाउ पर णाउ अप्पाण॥उणाराह॥परमानन्दम्भवं प्रोक्तं निर्वाणं च विरागतः॥मध्यमानन्दमात्रं तु सहजमेभिर्विवर्जितं॥पर
मानं देसंप्राप्त नानान्त्ववर्ज्जितेक्षणे॥ हस्मान्नूयान्महासत्त्व धारणीयं महासुखं॥ यावदा बोधिपर्यन्तं सत्वार्थं कुरु वज्रधृगित्यादि॥कथं तर्हि त्रिधाभिन्नमित्युक्तं पर
लहेत्वोरनन्यत्वात्रिधा पूर्वं प्रकीर्त्तितं॥विरमानन्दयोर्म्मध्ये प्रकाशत्वाच्चतुर्विधं॥ननु कथं योर्मध्ये प्रकाश्यमिति। परमान्ते मध्ये विरमस्य शून्याशून्यं तु वज्रधृगित्यागि

179 यस्तत्सुखमूर्द्धितं॥विनिविष्टेन्द्रियवर्गो नष्टविकल्पोऽसमाप्तभवबीजः॥आनन्दभाम श्रीसो गगनसमोप्यहह शीतलस्वाउः॥ इन्दीजत्थुविलीजगउ णाद्धअप्पसहा
व॥सो हलसहजानन्दमणाउ हुउ पुछह गुरुपाउ॥तदेवाह॥ तत्सौ न मायउद्वयेन समानकालमसंगतानि विषयेस्सममिन्द्रियाणि॥पश्चाभिनन्दजिनसुंदरमूर्त्ति
रको जानि कोपि णिभृत हृदि परिउ ताणां॥अतः। प्रतिहत सकलविकल्पावुद्धिर्यस्येह सत्सुखे वलति॥सच कृतकृत्यो विज्ञानन्ये येविपद्यश्च वस्ते॥आलोना
वदलमति विस्तरेण॥तस्मात्सम्यक सद्गुरुमाराध्य संसिद्धि ये॥ कायत्रयांतवर्त्तिमहासुखरूपं स्वसंविदितं कर्त्तव्यं॥इति प्रज्ञासत्येकः कृतकृत्य इदं ब्रूयात॥अयमे
सफलं जन्म सफलं जीवितं च मे॥अद्यबुद्धकुले जातो बुद्धपुत्रोस्मि सांप्रतं॥ ॥इति चतुर्थाभिषेकविधिः॥ ॥सम्प्रत्यग्निक्रियाऽभिधीयते॥तत्र पौष्टिके लक्षा
ग्रतो स्वरूपतो द्विहस्तप्रमाणं मपिकुण्डमीनकारयेत॥तत्रापि हव्यद्रव्यात्तु रूपतो ह्रासवृद्धिं विदध्यात्॥अर्द्धखातत्रिभागे द्विभागखातं वा॥कुण्डस्याष्टाभागं वा

178 वचनात्॥भून्याभून्यत्विनिकथं॥अनादिनिधनंशान्तंभावाभावत्मकंविभुं॥भून्यताकरुणाभिन्नबोधिचित्तमितिस्मृतं॥इतिसिद्धान्त॥तन्केनोपायनोत्पादनीयं॥मन
राउलचक्राद्युपायेनस्वाधिष्ठानक्रमेणाचेतिविस्तर॥एतच्चास्माभिन्नविवृतं।कस्मात्।यतः।स्वसंवेद्यमिदंज्ञानं॥वाक्पथातीतगोचरं॥अधिष्ठानपदज्ञेयंतत्सर्वज्ञ
ज्ञानतन्मयं॥अपरमप्युक्तं॥नान्येनकथ्यतेसहजंनकस्मिन्नपिलभ्यते॥आत्मना ज्ञायते पुण्यात्गुरुपर्वोपसेवया॥गुरुपादप्रसादेनमहापुण्यवतांस्वयं॥धगित्युत्पद्य
तेज्ञानंवाक्पथातीतगोचरं॥तथाचोक्तं॥जयतिसुखराजएकःकारणरहितःसदोदितोजगतां॥यस्यचनिगदनसमयेवचनदरिद्रोबभूवसर्वज्ञः॥तदुक्तमेखान्तरे॥रा ८९
तंवारेग्गुरुवाहईणानंवज्जुइसांसे॥सहस्सावत्थाअमिअरसक्कासुकहिज्जइकीस॥बुद्धेरगोचरतयानगिरांप्रचारेदुरेगुरुपथितवस्तुकथावतारः॥तदुक्तमेयाकरुणा
दिगुणाववदानेश्रद्धावतांहृदिपदंस्वयमादधाति॥ननुत्पन्नबोधिचित्तस्यकिलक्षणामिति॥तदुक्तं॥इन्द्रियाणिस्वपन्तीवमनोविशतीवच॥नष्टचेष्टइवाभातिका

180 षडभागेकभागप्रमाणामेष्टकेत्क्रानेमीच॥ ॥केषांचिन्मतेनत्वभ्यन्तरवेदिकायाअर्द्धप्रमाणांवहिर्वेदिका॥तद्बहिः खुरवरणादयोयथाशोभाःकर्त्तव्याः॥कुण्डम
ध्येचाष्टारचक्रंविलिख्यतन्मध्येशुक्लंपंचसूचिकवज्रंदिग्कोणेषुअक्षोभ्यादिचिन्हानिविलिखेत्॥विदिक्षुपरिपातितनोलेख्याश्चक्रवज्ररत्नपद्मविश्ववज्राःकल्पश्चतुष्को
णेषुचन्द्रवज्रीत्लिखेत्॥तच्चकुण्डंचतुरस्रमष्टांगरतन्नसद्दशपद्माकारंवाचक्राकारंवाकुर्यात्॥ततःकुण्डस्याभ्यन्तरवेदीषु॥ॐ वज्रसत्वआः॥इत्यनेनसप्तवारंपरि
जप्यतानिदीर्घतानिहूस्वंकुशद्वयमाचार्यस्यवाममारभ्यदक्षिणावर्तेनपराङ्मुखदक्षिणामुखपश्चिमाग्रमुत्तराग्रंस्थापयेत्॥ॐ इमेमहाकुशादिव्याःपवित्राब्रह्म ९०
देवता॥बुद्धधर्मसंघरताःपृथिवीजातस्त्वागर्भाः सर्वविघ्नशान्तिकुर्वन्तु स्वस्तिस्वाहा॥इतिमंत्रेणापूर्वाग्रैःकुशैःकुण्डमाच्छादयेत्॥ततःपलाशोदुम्बराश्वत्थाम्रकंदव
काः कंकेलिचूतयज्ञानप्लक्षवटादिक्षीरवृक्षजातकनिष्ठकाहस्तदीर्घैःक्षीरमधुरकाषायकाष्ठैरिन्धनराशिंविरचय्य॥संघराजन्यराजादियजमानस्याङ्गानामिनाप्रज्वा

181 लयेत्॥ ॐ ज्वलज्वलेभ्यो हूं॥ इत्यनेनाभिमंत्र्य अग्निस्थापनं कुर्यात्॥ महाबलिं च प्रचारयेत्॥ स्वस्थस्य पुष्टिकरणाय वामभागेयं त्रिकोपरि शंखत्रयं स्थाप्य॥ तदग्रे
प्रनीतपात्रद्वयं॥ तत्र वहिः स्थितं संविमलदल कुसुम कुस विद्धिकान्वितं प्रोक्षणाय॥ मधुर क्षीर कुसुमान्वितं मध्यास्थित मर्घाय॥ गन्धोदक लाजासहितं मभ्यन्तरस्थि
तं॥ पाद्याचमनाय॥ दक्षिणभागेतु समिधः कुसुंभ॥ मनुष्यवीज॥ प्रियङ्गु। सुमुखवीज॥ नागकेशर॥ सितपद्मकेशर। सर्ज्जरस। कुंकुम। कर्पूर। सितचंदन। रक्त
चन्दन। तिलतैल॥ निर्यास॥ अगरु। गुग्गुरु। रक्ततिल कृष्णतिल फलोपलि विल्वफल कोलहल लाज रक्त शालिधान्य यव गोधूम मास अक्षत तण्डुल दधि गुडोद
न दूर्वाकुराङ कुश त्रिमधु कनिक प्रकार धूप पुष्प नैवद्य गन्धवर्त्तिकादीन् हव्यद्रव्याणि स्थापयेत्॥ तत्र ज्वलिताग्निमध्ये पंकारज पद्ममालंव्य॥ तदुपरि रजानाग्नि मण्ड
ल रुक्मारोङ्कवपी तवर्णा मे कमुखं चतुर्भुजं वामे दण्ड कमण्डलु धरं॥ सव्य वरदाक्षमालाधरं॥ पीतांबराभरणा यज्ञोपवीतिनं॥ त्रिनेत्रं जयमकुट धारिणं वज्रसत्वालंक

183 पाद्यमन्त्रः॥ ॐ अग्नये प्रवरसत्काराय आचमनं प्रतीच्छ स्वाहा॥ आचमनमन्त्रः॥ ॐ वज्रनेज आँ इति मंत्रेणासमयाग्नौ प्रवेशयेत्॥ ॐ सर्वतथागत कायविशोधने हूं स्वाहा॥
पंचगन्धादिस्नानस्य॥ वाह्यपूजादि पूजा अष्टलास्यादिभिश्च संपूज्य घण्टांवादयेत्॥ तत्र प्रोक्षणं सर्वगात्रेषु॥ पाद्यं पादद्वयं॥ अर्घं मूर्द्धि॥ आचमनं वक्त्रे प्रकल्प
येत्॥ आचार्यस्य करपल्लव चतुर्भागैक भागेनाङ्गुली॥ तत्प्रमाणेन विषमयवाधिकाष्ठैः त्रिंशद्दङ्गुलीभिः समुदायेनं पत्र्यादीर्घ प्रमाणं॥ तत्र त्र्यङ्गुल प्रमाणं मध्ये व
ज्रं॥ दण्डोर्द्ध त्र्यंगुल प्रमाणोन्नतं॥ तद्दूर्द्धं विषमयवाधिकाय रंगुल प्रमाणाच्चतुरस्र प्रमाणं॥ तं त्रिभागेन खातं॥ खातमध्ये अष्टदलकमलकर्णिका यामूर्द्ध स्थित पञ्च
सूचिकवज्रं॥ समंततो वेदीनां प्रमाणमंगुलाद्वय। तद्वहिः सत्प्रमाणं लंवोष्ठः पद्मदलोपमाः॥ तदूर्द्धं त्र्यंगुलेन त्रिशूचिक वज्रं॥ रंध्रान्त्व भ्यन्तरे कनीयसी प्रमाणं रस
प्रवाहाय॥ तत्पार्श्वे पिण्डराङ॥ स्त्रवन्ने तत्र्यंगुल प्रमाणं॥ इति पात्री॥ पात्र्यनुरूपदण्ड वज्रर त्नाभ्यां मष्ठितं। त्र्यंगुल विस्तारास्य॥ पद्मपत्राकारा द्व्यंगुल निम्नास्वातिका॥

182 नमौलिनं समयाग्निविभाव्य॥ ॐ एह्येहि महाभूत देवर्षि द्विजसत्तमः॥ गृहीत्वाहुतिमाहार रश्मिन्सन्निहितो भवस्वाहा॥ इत्यनेन ज्ञानाग्निमावाह्य॥ ॐ आः टक्किरा
ज हूं जः॥ इति मन्त्रेणार्यक्किराजमुद्रयाकृष्य प्रवेशणाय॥ ॐ आः वज्रयक्ष सर्वपापविघ्नमारान् भस्मीकुरु हूं फट्॥ पञ्च सर्षपोदं चनस्य॥ ॐ आः वज्रकर्म्म सर्व
क्लेशोपक्लेशाग्नि शान्तिकुरु हूं फट्॥ उदकोदञ्चनस्य॥ ॐ आः वज्ररक्षस सर्वावरणमलानपनय हूं फट्॥ शुक्लसरावोदंचनस्य॥ ॐ आः वज्रसन्धि सर्वप्रणपञ्चान स
भारान्स्थैकय हूं फट् स्वाहा॥ भक्तोदञ्चनस्य॥ एतानि मन्त्राणि निर्म्मेक्षु प्रोक्षणार्घं पाद्याचमनं चकृत्वा समयं च दर्शयेत्॥ ॐ अग्नये दीप्यदीप्या विषाविषमहाश्रिये ह
व्यकव्य वाहनाय॥ यर्दृश्य जः हूं वं हो समयस्त्वंमिति॥ दक्षिणाकरमभयप्रदानाकारेण तर्ज्जनीकुण्डलाकारेणाकुञ्चयित्वा मध्यमानामीय पर्व धारयेत्॥ अङ्गुष्ठ तर्ज्जनी पा
र्श्वोस्थि नाग्नेः समयमुद्रा॥ ॐ वज्रयक्ष हूं॥ प्रोक्षणमन्त्रः॥ ॐ अग्नय प्रवरसत्कारायार्घं प्रतीच्छ स्वाहा॥ अर्घमन्त्रः॥ ॐ अग्नय प्रवरसत्काराय पाद्यं प्रतीच्छ स्वाहा॥ ९१

184 परमायवज्रांकितमध्याश्रुवा॥ नेत्रपात्रीश्रुवा हेममताम्रादिद्रव्योत्पन्ना॥ इतिपात्रीश्रुवालक्षणा॥ ततोऽग्निमुखेरकारेण यवहलप्रमाणांश्च क्लीवज्रं विभाव्य जानुना भूतलर
स्थितं श्रुवेण वह्निमुखे वह्नेः स्वमन्त्रेणानि स्रो घृतेनाहुतीर्दद्यात्॥ मन्त्रः॥ ॐ अग्नये स्वाहा॥ ततो घृतोपलिप्ताभयाग्राः समिधः परिपाद्या जुहुयात्॥ ॐ अर्क्काय स्वाहा॥
अर्क्कस्य॥ ॐ वज्रसोमाय स्वाहा॥ पलाशस्य॥ ॐ वज्राङ्गाराय स्वाहा॥ खदिरस्य॥ ॐ वज्रबुधाय स्वाहा॥ अपामार्गस्य॥ ॐ वज्रकुवेराय स्वाहा॥ वटस्य॥ ॐ वज्रयमाय स्वा
हा॥ उदुंवरस्य॥ ॐ वज्रशनिश्चराय स्वाहा॥ सम्या॥ ॐ वज्रवोधिवृक्षाय स्वाहा॥ अश्वत्थस्य॥ ॐ वज्रज्वलनाय स्वाहा॥ प्लक्षस्य॥ ॐ वज्रब्रह्मवीजाय स्वाहा॥ ब्रह्मतरोः॥ ॐ
मधुने स्वाहा॥ मधुन॥ ॐ अशोकाय स्वाहा॥ अशोकस्य॥ ॐ सर्वपापप्रसमनाय स्वाहा॥ वैकङ्कस्य॥ ॐ वज्रसहकाराय स्वाहा॥ आम्रस्य॥ ॐ सर्वक्लेश प्रसमनाय स्वाहा॥ ९२
कदम्बगम्भारप्रभृतीनां॥ ॐ अप्रतिहतवज्राय स्वाहा॥ कुशानां॥ ॐ वज्रायुषे स्वाहा॥ दुर्वाङ्कुरस्य॥ ॐ सर्वपापदहनवज्राय सर्वपापं दह स्वाहा॥ तिलानां॥ ॐ वज्रपुष्टये

185 स्वाहा॥ अखण्डतण्डुलानां॥ ॐ वज्रवेगाय स्वाहा॥ यवानां॥ ॐ वज्रघस्मराय स्वाहा॥ गोधूमस्य॥ ॐ वज्रबीजाय स्वाहा॥ धान्यानां॥ ॐ महाबलाय स्वाहा॥ माषाणां॥ ॐ व
ज्रलाजाय स्वाहा॥ लाजानां॥ ॐ सर्वार्थसिद्धये स्वाहा॥ श्वेतसर्षपस्य॥ ॐ सर्वसंपदे स्वाहा॥ दधिगण्डानयाः॥ ॐ वज्रप्रियतमाय स्वाहा॥ प्रियंगुकुसुमानां॥ ॐ अ
वज्रदर्शनफलाय स्वाहा॥ कोलफलादिनां॥ ॐ गगने गगनविलोकिने हूं फट्॥ तेजो राजन् अमुकस्य पुष्टिं कुरु स्वाहा॥ बिल्वादिफलादीनां॥ ॐ त्रिनेत्रेन स्वाहा॥ अन्यमन्यथांहो
तव्यानां॥ ततो गान्वभ्यन्तरस्थितवामकरेण घृतपूर्णपात्रीमादाय॥ दक्षिणकरेण धोमुखशुवमादाय मनमोल्पप्रदक्षिणाकारयित्वा॥ आत्मानमिष्टदेवतारूपं मुद्वह
नवह्नेर्बिम्बं तन्मुखे यथासंभवमेकत्रिपञ्चसप्तकविंशत्याहुतीर्दद्यात्॥ मन्त्र॥ ॐ अग्नये दीप्यदीप्याविधाविभ्रमहाश्रियेहव्यकव्यवाहनाय अमुकस्य पुष्टिं कुरु ॐ स्वाहा
तत्रयदिह सर्वाद्रव्यं तदग्नेर्मुखे दद्यात्॥ समिधकुशादि प्रभामण्डले भिक्षुभोज्यादिकं करे॥ कुसुमशिरसि॥ धूपं ज्वालायां॥ गन्धहृदि॥ दीपनैवेद्यादिकं पुरस्तात्॥

187 रिकादिसुगन्धगन्धिको विद्यास्थानाभिपत्प्रदः॥ ॥वीणावेणुशंखकाहलमृदंगादितूर्यसुस्वनः सर्वसुखप्रदः॥ ॥ध्वजमीनकलशांभोजशंखखड्गाव
चामरत्रिशूलस्रजाश्वस्वस्तिकश्रीवत्सनन्द्यावर्तेषु नाडजातेषु वह्नेर्दक्षिणावर्तेः सद्गुणकारो महार्थदः॥ शुभनिमित्त॥ ॥धूमलाञ्छनज्वलाज्वालावहुपुमावहुरोग
दः॥ निस्तेजो लेलिहानन शिखाविच्छिद्यमानाविहेतुमन्युदः॥ प्रकंपितो वामावर्तो भ्रमति मुहुर्मुहुर्भूमौ गोत्रक्षयंकर॥ ॥रूक्षो विवर्णोऽतिकर्बुरो नीलश्यामः स्वार्थविनाशकृत्॥
जलत्प्राणिगन्धो दुर्गन्धो महिषमार्जारश्वशृगालगन्धोऽजगरकाकगन्धः स्वेदगन्धो वादात्तु विनाशकरः॥ जलदस्वनश्चटचटछमछमसिमिसमायमानो विषमस्वनस्ती
क्ष्णस्वनोऽर्थहानिकृत्॥ उष्ट्रगोशीर्षशूलसर्पभयानकाकारोऽग्निः शत्रुभयमादिशति॥ इत्यशुभनिमित्त॥ ॥अशुभनिमित्तेसति सार्वकर्मिककलशोदकेन सप्र
वारान् पर्युक्ष्य पात्रीश्रुवाभ्यां सप्तकृताहुतीर्दद्यात्॥ ॥ततो वह्नेराचमनादिकं कृत्वा लोकोत्तरज्ञानाग्निविभाव्यज्वालाकारा गौरयक्ष्माग्नेहृदि कमलचंद्रासने अरिमण्ड

186 इति मन्त्रहोमाङ्गजेफलं॥ भूमिक्षेत्रविवर्द्धनी॥ गृहवृद्धिकृतकरणं। सर्वसंपत्करंघृतं॥ इन्धनंसौर्यकारि। कुशोरक्षाकर। शान्तिकारकः॥ सिद्धार्थः तण्डुलः पुष्टिकारकः
तिलंपापहारि। धान्यमर्थाकर्षक। मांसंबलकरं। यववेगप्रदं॥ आयुर्वृद्धिकरीदूर्वा। दीर्घानीरोगकरोरोगो धूमः॥ मधुकीर्तिप्रदं॥ सर्वसौख्यप्रदोदधिगुडोदनो॥ सर्व
संपत्तिकरंफलं॥ पुत्रपौत्रादिविवर्द्धनंबिल्वफलं॥ सौभाग्यप्रदंपद्मोत्पलपुष्पादिकं॥ तेजोवृद्धिकरंदीपं॥ श्रीकस्वचन्दनादिगन्धलक्ष्मीप्रदंतांबुलं॥ ० ॥ ततोग्नेशुभा
शुभनिमित्तंपरीक्षयेत्॥ नैकशिखाज्वालासर्वसंपत्तिदा॥ चतुःशिखापुष्टिकारिणी॥ एकपिण्डोमहार्थदः॥ निष्कंपद्विशिखामध्यमा॥ ॥ चक्रकान्तिमणिकर ५३
कजुषारः कुन्देन्दुरूपवर्णा सर्वपापविनाशनं॥ सुवर्णपुष्परागोपमअनेकसंपत्तिकारक। जवाशोककुसुम्भवधूकः किंसुकइन्द्रगोपविद्रुमोत्तप्तकांचनसंनिभा
राज्यैश्वर्यादिवश्यकृत्॥ निर्द्धूमस्निग्धवैडूर्यसंनिभआयुरारोग्यवृद्धिकृत्॥ ० ॥ अगरुचंपकाशीरोत्पलमालतीपद्ममल्लिकासिहूचन्दनकर्पूरकुंकुमकस्तु

188 ला। धिपतिबीजनिष्पन्नचिन्हबीजपरिणामेनमण्डलाधिपतिसमाण्डलेयंविभाव्यज्ञानसत्वञ्चवज्राङ्कुशादिभिराकृष्यप्रवेश्यबद्धासनो ब्यक्षीरनीरमिवसमय
सत्वेनसहैकीकृत्य अभिषिंच्यप्रोक्षणार्घं पाद्याचमनादिकं पूजास्तुतिपर्यन्तंकृत्वास्तुजयात्॥ पूर्ववत्॥ पूर्णाहुतिस्वहृदयमन्त्रेण त्रिपंचसप्तकविंशतिवारंघृतपूर्णा
पात्रीश्रुवेण॥ वधूतीगतप्राणाकृत्वादानपतिनासहस्थाने॥ प्रोक्षणाचमनञ्चकृत्वासंपूज्यस्तुतिंचकुर्यात्॥ ततः ॐ आः समाधिफलअँ स्वाहा॥ फलस्यैकनमन्त्र॥
ॐ आः वज्रवासमे हूँ स्वाहा॥ वस्त्रस्य॥ ॐ आः वज्रतांबुलाय स्वाहा॥ तांबुलस्य॥ ॐ आः सुपुष्पेसुकुलेवलेज्वलनीये पुष्टिंकुरु स्वाहा॥ पद्मोत्पलादिपुष्पस्य॥ ॐ धर्म्म
धर्म्मराजेपद हर सर्वविघ्नान्प्रशान्तिकुरु स्वाहा॥ चन्दनादिसुगन्धस्य॥ ॐ आः वज्रधूपे हूँ स्वाहा॥ धूपस्य॥ ॐ आः वज्रपुष्पे हूँ स्वाहा॥ पुष्पस्य॥ ॐ आः वज्रदीपे हूँ ५४
स्वाहा॥ दीपस्य॥ ततः समाण्डलेयमण्डलाधिपतिं स्वशरीरे विनिवेस्य॥ पूर्ववदग्निदेवतांविभाव्य॥ अर्घादिवाह्यपूजांकृत्वा॥ ॐ आः हव्यभक्षहव्यपरिशिष्टान

189 ॐ नमः हूं स्वाहेति मन्त्रेणाशीताहुतिं दद्यात्॥ पूर्णाहुतिं च दद्यात्॥ मन्त्रः॥ ॐ आहे हव्यभक्ष दानपते यथाभिलषितम् पूरय २ पूर्णाहुतिं प्रतीच्छ हूं स्वाहा॥ प्रोक्षणं च
मनस्यं कृत्वा पूर्ववत् फलादीन् ढौकयेत्॥ बाह्यपूजां स्तुतिं च कारयेत्॥ ततः स्वहृद्बीजात् स्फारितदेवतामेघेज्ञानामृतरत्नकलशधारे यजमानमभिषिंच्याशीर्वा
दं दद्यात्॥ ततो न्यूनाधिकदोषहानये विज्ञाप्य क्षमापयेत्॥ यत्कृतं दुष्कृतं किंचिन्मया मूढधिया पुनः॥ क्षन्तव्यं तत्त्वया नाथ यदि त्वं नाथ देहिनां॥ ततो वज्रसत्त्व श
त्यनेकवारपरिजप्य शताक्षरं पठित्वा बलिं दत्वा संहृत्य उत्थापय्य इन्द्रादिलोकपालेभ्यो वा एवं बलिं दद्यात्॥ आलीढपदेन प्राङ्मुखं स्थित्वा वाममवज्रं प्रदर्श्य दक्षिणं
वज्रं कटिप्रदेशे संस्थाप्य दक्षिणतर्जन्यंकुशेनावाहयेत्॥ आवाहनमुद्रा॥ ततः समपदं स्थित्वा तर्जन्यंकुशरहिता समयमुद्रा॥ प्रोक्षणार्घपाद्याचमनं च कृत्वा पुष्पा
दिभिः संपूज्य घण्टास्फालनादींश्च कृत्वा॥ ॐ नमो वज्रस्य चतुर्दिक्षु शिरसि वज्रपाणिरक्षश्च स्वाहा॥ इत्यनेन बलिं दद्यात्॥ ततः प्रत्यालीढपदेन स्थित्वा आवाहनमुद्रया तर्जनी

191 दक्षिणमुष्टेस्तर्जन्यंगुष्ठावेकत्रो योज्यौ॥ वाममुष्टिं हृदि कृत्वा तर्जन्यंकुशेनावाहयेत्॥ सैवांकुशरहिता समयः॥ ॐ नृ २ पुठ २ नशिखनोलि विरूपाक्ष स्वाहा॥ वा
मतर्जनीप्रसार्य विसर्जनं वरुणस्य॥ वाममुष्टावङ्गुष्ठेन मध्यमानामीयपर्वं तर्जनीकुण्डलाकारेण धारयेत्॥ दक्षिणमुष्टिं कटिप्रदेशे संस्थाप्यांकुशेनांगुष्ठवाहये
त्॥ सा एव दक्षिणांगुष्ठप्रवेशात् समयः॥ ॐ सुसरवारव रक्ष रक्ष स्वाहा॥ अन्ते वांकुशप्रसारणे विसर्जनं वायोः॥ ६ ॥ अभ्यन्तरवज्रबन्धे कनिष्ठाद्वयं सूचीकृ
त्वा। तत्पृष्ठेन अनामिकायुगलं पृथक् पृथक् संस्थाप्य मध्यमाद्वयं सूचीकृत्वा वज्राकारेणानयेदावाहनं॥ अस्या एव मध्यमाद्वयं प्रवेश्य समयः॥ ॐ कुवेराय स्वाहा
आवाहनमुद्रायां मध्यमाद्वयं प्रसार्य विसर्जनं कुवेरस्य॥ ७ ॥ कन्यसानामिकाभ्यां तलवज्रबन्धं कृत्वा अंगुष्ठयुगलं मध्यमाश्रितं मध्यमसूच्याः पृष्ठत
स्तर्जनीद्वयं वज्राकारेण संस्थाप्यांकुशं च परस्परं नखाग्रसक्तं कुर्यादावाहनं॥ पूर्ववद्वज्राकारेण धारणात् समयः॥ ॐ हूं शिव स्वाहा॥ सैव तर्जनीप्रसारणाद्विसर्जन

190 प्रसार्य्य विसर्ज्जयेदिति शक्रस्य॥ ॥वक्ष्यमानघ्यप्याकर्षणसमयविसर्ज्जनेषु यथाक्रममालीढसमप्रत्यालीढपदानि॥ प्रोक्षणादि पूजांश्च पूर्ववत्॥ मन्त्रमुद्रा
नांतु विशेषः॥ दक्षिणातर्ज्जनीकुण्डलाकारेऽकुंचयित्वा मध्यमसूच्यारूत्नीय पश्चाद्धारयेदङ्गुष्ठश्च करमध्ये स्थापयेदित्यावाहनं॥ अस्यामुद्रायाअङ्गुष्ठतर्ज्जनीपार्श्वो
श्रितसमयः॥ ॐ एह्येहि कपिल ज्वल२ हर२ शिखि नोलि विरूपाक्ष स्वाहा॥ अस्यामुद्रायास्तर्जन्यंगुष्ठंनखाश्चैकतो योज्य विसर्ज्जयेदित्यग्नेः॥ २ ॥ अनामिकाभ्यांस्
चीकृत्वा शेषैरभिमुखाभ्यन्तरवज्रबन्धे पुनरनामिके पृथक्कृत्वाकुंच्याकर्षयेत्॥ आवाहनं॥ अस्या मुद्राया आकुंचनरहिता हृदि धारयेत्॥ समयः॥ ॐ यमाय स्वा
हा॥ समयमुद्रापरि मुक्तगाढ्विसर्ज्जनमिति यमस्य॥ ३ ॥वाममुष्टिं कटिप्रदेशे संस्थाप्य तर्ज्जनीकुंचयित्वा दक्षिणमुष्टामध्यमातर्ज्जनीभ्यां खड्गाकर्षणा ५५
वाहनं॥ अस्या एव वामतर्जन्याकुंचनरहिता समयः॥ ॐ सर्वभूत भयङ्कर क्रुरु२ स्वाहा॥ अस्या एव वामतर्ज्जनीप्रसारनाद्विसर्ज्जनमिति नैरृत्यस्य॥

192 मितीशानस्य॥ ८ ॥ उर्द्धदृष्ट्वा संपुटं अंजलिंकृत्य तर्ज्जनीद्वयमाकुंच्यावाहयेत्॥ अस्या एव तर्ज्जनीद्वयं पूर्ववत्संस्थाप्य समयः॥ ॐ उर्द्ध ब्रह्मणे स्वाहा॥ ॐ सूर्याय
ग्रहाधिपतये स्वाहा॥ ॐ चन्द्राय नक्षत्राधिपतये स्वाहा॥ आवाहनमुद्रायास्तर्ज्जनीद्वयं प्रसार्य्य विसर्ज्जनं ब्रह्मादीनां॥ ९ ॥ हस्तद्वयेन जलाञ्जलिं कृत्वा गुष्ठौ वक्र
लाकारमवाङ्मुखिं कृत्वा तर्ज्जन्यंकुशाभ्यामावाहयेत्॥ तर्ज्जन्यंकुशरहिता समयः॥ ॐ अधः पृथिव्यै स्वाहा॥ ॐ असुरेभ्यः स्वाहा॥ ॐ नागेभ्यः स्वाहा॥ अत्रैव तर्ज्जनीद्वयं
प्रसार्य्य विसर्ज्जनं पृथिव्यादीनां॥ १० ॥ पुनर्मण्डलगृहे प्रवेश्य मण्डलेषु पुष्पादिभिः संपूज्य त्रिप्रदक्षिणीकृत्य मुकुटवस्त्रालंकाराभरणानि यथास्थाने स्थापयेत्॥
एवं यावत्समाप्ति पर्यन्तं प्रतिदिनं कुर्यात्॥ ० ॥ इदानीं लभाहुतो हव्यप्रमाणमभिधीयते॥ तिलान्यष्टोत्तरशत प्रस्थानि॥ १८ ॥ घृतानि पञ्चविंशति घटि ९६
का॥ २५ ॥ धान्ययव गोधूमा प्रत्येक द्वादश प्रस्थानि॥ १२ ॥ अखण्डतण्डुलानि नव प्रस्थानि॥ ९ ॥ कोलफललाजमाषोडश दश प्रस्थानि॥ १० ॥

193 अभावे पंचविंशतिविल्वफलानि॥ २५॥ शेषद्रव्यानि यथासम्भवं॥ सूर्यदिने शमिधः। अर्कोद्वादशः॥ १२॥ वटीः पञ्चविंशति॥ २५॥ सोमदिने पलाशा विंश
ति॥ २०॥ आम्रास नदशः॥ १७॥ शुक्रदिने उडुम्बराउन विंशति॥ १९॥ कदंवा अष्टादश॥ १८॥ सोमदिने खदिरा एकविंशति॥ २१॥ शालाः षोडशः॥ १६
बुधदिने अपामार्गा द्वाविंशति॥ २२॥ प्लक्षाः पञ्चदशः॥ १५॥ वृहस्पतिदिने अश्वस्था चतुर्विंशति॥ २४॥ मधुकास्त्रयोदशः॥ १३॥ शनिश्चरसम्पश्च
दशः॥ १४॥ अशोकास्त्रयोविंशति॥ २३॥ शेषसमिधोयथासम्भवं॥ ० ॥ इदानीविधानमाह॥ प्रथमं तावद्विहारादिप्रतिष्ठाकर्तुकामा यजमानः शुभेअह
नि आचार्याराम आचार्ययोराचार्यस्य ग्रहंगत्वा मराउलकमभिधीय गन्धस्रकतांवलादिकं वस्त्रयुगलं प्रनोकं दत्वा याचयेत्॥ अध्येषयामि हे नाथ त्वं मे शास्ता महा
विभो॥ सर्वसत्वानसंसारसागरा दुत्युद्धवेप्रतिष्ठापनाय युष्माकपूजनाय च॥ विहारादिप्रतिष्ठां महामराउलवर्त्तनं वाहोमं वा करिष्या मियुष्माभिर्यत्कर्त्त

195 वीज॥ जयेर पीतः॥ कोलागिरिचराउभैरवो रक्तः। ऊन्नागवक्ष शंखपालो नागपीतः॥ वलि मांसं॥ दशाम्यांद्वितीया यां सोमदिने पूजयेत्॥ ॐ ह्रीं श्रीं हूं हः को
लागिरि विघ्नविनाशाय फट् स्वाहा॥ क्षेत्रपालस्य॥ ॐ करुद्राणी रुद्रलोक अवतर शीघ्रं हूं फट् स्वाहा॥ आवाहन॥ ॐ फें फट् माहेश्वरीयेनमः स्वाहा॥ मूलमन्त्रः॥
ॐ हूं रुद्रचराउस्वाहा॥ भैरवस्य॥ शेषाणि पूर्वोक्तमन्त्राणि॥ २ ॥ आग्नेयेशा कौमारी रक्ताः। चकारवीजः। वज्रीरक्तः। अट्टहासक्षेत्रः। क्रोधभैरवो हरितः। कर्कोट
कः॥ पद्मोनागो धवलः॥ वलि अडुगराडः॥ ततीयाया मेकादश्यां वा मंगलवारि पूजयेत्॥ ॐ ह्रीं श्रीं हूं हः॥ अट्टहासाय विघ्नविनाशाय फट् स्वाहा॥ क्षेत्रपालस्य॥
ॐ चकौमारी उमालोक अवतर२ शीघ्र हूं फट् स्वाहा॥ आवाहनं॥ ॐ फें फट् कौमार्यैनमः स्वाहा॥ मूलमन्त्रः॥ ॐ हूं रक्तचराउस्वाहा॥ भैरवस्य॥ शेषाणि पूर्ववत्॥ ३
नैऋत्यावैष्णवी श्यामा॥ टकारवीज। राक्षसाधिपति॥ जयंती॥ उन्मत्तभैरवः॥ कृष्ण॥ पर्कटीवृक्षः॥ नीलऽनन्तः॥ वलिपिष्टकः॥ प्रतीमारः॥ चतुर्थ्या द्वादश्यां वा वुध

194 यंतत्करणीयमिति॥ ततोष्टश्मशान पूजांकर्त्वेनाचार्यमण्डलाधिपति मन्त्रंलक्षंमाण्डलेयानांप्रत्येकं मयुतंजपेत्॥ तत्रश्मशानपूजामाह॥
पूर्वेण॥ तावद्ब्रह्मणी पीतं॥ अकारवीजं॥ शक्र॥ पीतप्रयोग॥ असिताङ्ग भैरव॥ नागकेशरवृक्ष॥ महापद्मनागपीत॥ वलिरुधिरं॥ चिन्ह पंचपताका॥
प्रतिपदिनवम्यां रविवारेपूजयेत्॥ ॐ ह्रीं श्रीं हूं हः प्रयोगस्य विघ्ननाशाय फट् स्वाहा॥ क्षेत्रपालमन्त्रः॥ ॐ गं गणपतये नमः स्वाहा॥ विनायकमन्त्रः॥ ॐ स्कं
न्धाय नमः॥ कुमारस्य॥ ॐ महाकालाय नमः॥ महाकालस्य॥ ॐ अब्रह्माणी ब्रह्मलोके अवतर २ शीघ्रं हूं फट् स्वाहा॥ भगवत्या आवाहनमन्त्रः॥ ॐ हं ९७
ब्रह्मणे नमः स्वाहा॥ पूजामन्त्रः॥ ॐ हूं वज्रचण्ड स्वाहा॥ भैरवस्य॥ ॐ ह्रीं नीलजीमूत संकाश घोरदंष्ट्र भयावह उर्द्ध्वकेश विरूपाक्ष क्षेत्रपालवटुदर हूं एह्ये
हि वलिं प्रतिगृह्ण २ हन २ दह २ पच २ खद २ खाहि २ भंज २ विघ्नभैरव रूपेण वलिं प्रतिगृह्ण २ ह्रीं फट् स्वाहा॥ वलिमंत्रः॥ १ ॥ उत्तरेणारौद्रिसित॥ ककार

196 दिनेपूजयेत्॥ ॐ ह्रीं श्रीं हूं हः॥ जयंती विघ्ननाशाय फट् स्वाहा॥ क्षेत्रपालस्य॥ ॐ ट वैष्णवी विष्णुलोकं अवतर २ शीघ्र हूं फट् स्वाहा॥ आवाहनं॥ ॐ फें फट् वैष्णवी
येनमः स्वाहा॥ मूलमन्त्रः॥ ॐ हूं वीरचण्ड स्वाहा॥ भैरवस्य॥ शेषाणि पूर्ववत्॥ ४ ॥ दक्षिणे वाराहीरक्ताः॥ नकारवीज। यमस्कांवकः॥ कपालभैरव॥ पिङ्गलः॥ चूतवृ
क्षः॥ नागः कुलिकः॥ नील॥ पञ्चम्यां त्रयोदश्यां॥ गुरुवारे वा पूजयेत्॥ वलि पंचपताका॥ ॐ ह्रीं श्रीं हूं हः स्कांव विघ्ननाशाय फट् स्वाहा॥ क्षेत्रपालस्य॥ ॐ नवारा
ही भूर्लोक अवतर २ शीघ्र हूं फट् स्वाहा॥ आवाहनं॥ ॐ फें फट् वाराहे नमः स्वाहा॥ मूलमन्त्रः॥ ॐ हूं विजयचण्ड स्वाहा॥ भैरवस्य॥ शेषाणि पूर्ववत्॥ २ ॥ पश्चि
मस्न्द्राणि॥ कुंकुमवर्णा पकारवीजा॥ वरुण क्षेत्र॥ वरुणाधिपति॥ रुरुभैरवः पीतः॥ वलिमत्स्य॥ अश्वस्थवृक्षः॥ रुपामः कर्कोटकनागः षष्ठ्यां चतुर्दश्यांशुक्रदिने वा ९८
पूजयेत्॥ ॐ ह्रीं श्रीं हूं हः वारानस्यां विघ्ननाशाय फट् स्वाहा॥ क्षेत्रपालस्य॥ ॐ प महेन्द्री सुरलोक अवतर २ शीघ्रं हूं फट् स्वाहा॥ आवाहनं॥ ॐ पें फट् इन्द्राणे नमः

197 स्वाहा॥मूलमन्त्र॥ॐ हूं घोरचण्ड स्वाहा॥भैरवस्य॥शेषाणि पूर्ववत्॥ ६ ॥वायव्ये चामुण्डी रक्ता॥यकारबीजं॥देवीकोट्ट॥संहारभैरवो रक्तवर्णः॥वायुरूपा मः॥उ
दुम्बरवृक्षः॥वासुकीन्नाम नागो गौरवर्णः॥सप्तम्यां पूर्णमास्यां शनिश्चरवारे वा पूजयेत्॥बलि सिन्दूराजनः॥ॐ य चामुण्डी सुरलोक अवतर २ शीघ्र हूं फट् स्वाहा॥
आवाहन॥ॐ फें फट् चामुण्डाय नमः स्वाहा॥मूलमन्त्रः॥ॐ हूं कालचण्ड स्वाहा॥भैरवस्य॥ॐ ह्रीं श्रीं हूं हः देवीकोट्टस्य विघ्ननाशाय फट् स्वाहा॥क्षेत्रपालस्य॥शेषा
णि पूर्ववत्॥ ७ ॥ऐशान्य महालक्ष्मी सिता॥शकारबीजं॥भीषणभैरवः॥पिङ्गलवर्णः॥चिरित्र क्षेत्रः॥वटवृक्षः॥महेश्वरः॥रक्तनक्षक नाग॥अष्टम्यां ममावास्या स
र्ववारे वा पूजयेत्॥बलि सर्ववर्णाः॥ॐ ह्रीं श्रीं हूं हः चरित्राय विघ्ननाशाय फट् स्वाहा॥क्षेत्रपालस्य॥ॐ शः महालक्ष्मी सुरलोकं अवतर २ शीघ्र हूं फट् स्वाहा॥आवाहन॥
ॐ फें फट् महालक्ष्मी नमः स्वाहा॥मूलमन्त्रः॥ॐ हूं अग्रचण्ड स्वाहा॥भैरवस्य॥शेषाणि पूर्ववत्॥ ८ ॥ततः शुभग्रहे पि लक्षिते शुभतिथि नक्षत्र मुहूर्ते ऽग्निकुण्ड

199 पुष्पाणि विस्तराणि॥ विस्तराश्च मालापुष्पं॥गन्धधूपदीपाश्च विस्तराः॥दिनं प्रति गुग्गुल पल पलचतुष्टयं॥महाबलि तण्डूल प्रस्थ निसप्त॥तत्र पञ्चधाराक्षीरकुण्ड द्वयं २
मद्यकुण्ड द्वयं २ रुधिरकुण्ड द्वयं २ मत्स्य मांस खाद्य विविध पूजा॥ ॥इदानीं रजोविभागः कालचूर्ण प्रस्थ चतुष्टयं॥ ४ ॥शुक्लरजः प्रस्थत्रयं॥ ३ ॥सिंदूर प्रस्थद्वयं॥
२ ॥नीलरजः प्रस्थैकं॥ १ ॥पीतरजः प्रस्थद्वयं २ हरितरजः कुण्डद्वयं २ ॥आचार्यस्य पूजा प्रत्येकं तूलासनानि तूलमसूरकानि चत्वारि॥कटिवेष्टनकञ्चुकं शिरोवेष्ट
नि वस्त्राणि॥सुवर्णतिलकः सुवर्णाङ्गुलिः॥सुवर्णकुण्डलं॥सुवर्णकुण्डलं॥सुवर्णकण्ठिकाद्याभरणानि॥यथाशक्ति दक्षिणा॥धर्मभाणके पूजा प्रत्येकं तूलासनं च नवस्त्र
सुवर्णाङ्गुलिकं॥यथाशक्ति दक्षिणा॥अग्निकुण्डवेष्टनारक्षवस्त्रं॥दीर्घकुसुममाला॥कलशानां दीर्घकुसुममालाश्च॥तिलपात्रं॥यज्ञकुम्भ॥ताम्रचरु॥दिनं प्रति यथाश्रद्धया
सुवर्णाञ्च हातव्य॥ग्रन्थविस्तरभयान्नोक्तं॥इदानीं पिण्डिका स्थापनाय नवकोष्ठकविभागोऽभिधीयते॥तत्रादौ लयस्य भ्यन्तरव्यायामे सप्तसप्तविभागेन ऊनपञ्चाश

198 रजःपिरिडकां स्नानपिरिडकां मिन्द्रादिलोकपालकलशस्थानपिरिडकां वाह्यवलिपिरिडकां चारोपयेत्॥ तत्र रजपिरिडका षट्हस्त कनीयसी प्रमाणा॥ अतोन्युनानकर्तव्याः॥ अतोधिकातु मराडलनाम तु सारेणा वृद्धिः॥ एकहस्तप्रमाणा लोकपालानां कलशपिरिडकाः॥ तत्प्रमाणा वाह्यवलिपिरिडका श्चतुर्दश॥ मराडलगृहात्पूर्वदिशि ईशा
णाकोणे वा स्नानपिरिडका श्चतुरस्रा श्चतुर्हस्तप्रमाणा॥ तत्स्नाने छ्युयाकार्याः॥ कलशं प्रति कलशं तुवलकाणि॥ छत्राणि॥ रूप्यकनेत्रयुगानि॥ सुवर्णतिलकानि॥ अक्षतकानि
वस्त्राणि॥ पञ्चरत्नपुटानि॥ युगानि॥ पञ्चव्रीहि पंचौषधि पञ्चपल्लवा॥ षट्शपपुटानि॥ पञ्चगन्ध॥ पंचामृतानि॥ पंचगव्य॥ पंच पताका॥ पंचसूत्राणि॥ षट्पलानि॥ ९९
इन्द्रादीनां पताका॥ तत्र ब्रह्मेन्द्र पृथ्वी कुवेराणां पीताः॥ ४ ॥वह्निसूर्ययोरक्ते॥ ५॥ यमस्य नील॥ राक्षसस्य कृष्ण॥ ॥वायोः सवला॥ ॥विमचित्रिणा रूपामाः॥
दीर्घेण चतुर्हस्त॥ ॥व्यायाम॥ हस्तैक प्रमाणां॥ परिक्रम दिवसे पर्णापूर्वं वलि सहस्रत्रय॥ तद्दिव समारभ्य प्रतिदिनं वलिमष्टोत्तरशतं॥ नैवद्यं तत्तुल्य॥ प्रकरणा

200 कोष्ठकानि भवन्ति॥ तत्र मध्येक कोष्ठक ब्रह्मस्थानं॥ तद्बहिरष्टकोष्ठकानि देवभागः॥ तद्बहिः षोडशकोष्ठकानि मनुष्यभागः॥ तद्बहिः चतुर्विंशतिकोष्ठकानि प्रेतभागः॥ ततो भित्तरयन्त
श्चतुःकोष्ठान्तन्त्समन्तिर्यगभ्यन्तरे चतुरस्र नवकोष्ठकानि वालुकाभि प्रपूर्य कोटयेत्॥ तत्र नवकोष्ठकेषु पंचामृत पंचौषधी पञ्चगन्ध पञ्चसूत्राणि प्रक्षिप्य पारारसेन पारपूर्यमुखानि
विधाय ताम्रमयानि नवमधुकुम्भानि स्थापयेत्॥ अथवा मध्ये नैशानादि कोणकोष्ठकेष्विति पञ्च॥ अथवा मध्यकोष्ठके स्थापयेत्॥ तत्र मध्ये प्रतिस्थापनीय देवनाममन्त्रेणाष्टोत्तर
शतवारं परिजप्य॥ दिक्षु स्वस्वदिगतनथागत मन्त्रेणाः॥ स्वैशानादि विदिक्षु द्वारपाल चतुष्टयाणां मन्त्रेणाभिमन्त्र्य स्थापयेत्॥ अथवाष्टाष्टक विभागेन चतुःषष्टि कोष्ठकानि
भवन्ति॥ तत्र मध्य चतुःकोष्ठकानि ब्रह्मस्थानं॥ तद्बहिर्द्वादशकोष्ठकानि देवभागः॥ तद्बहिर्विंशतिकोष्ठकानि मनुष्यभागः॥ तद्बहिरष्टाविंशति कोष्ठकानि प्रेतभागः॥ अथवा १००
नवनवविभागेन एकाशीति कोष्ठकानि भवन्ति॥ तत्र मध्ये नव कोष्ठकानि ब्रह्मस्थानं॥ तद्बहिः षोडशकोष्ठकानि देवभागः॥ तद्बहिश्चतुर्विंशतिकोष्ठकानि मनुष्यभागः॥

201 तद्बहिः द्वात्रिंशत्कोष्ठकानि प्रेतभागः॥ इदानीं मूलपंचाशतः चतुःषष्टिरेकाशीतिकोष्ठकानि प्रत्येकं विशुद्धिरभिधीयते॥ तत्र ब्रह्ममोक्षं प्रज्ञापारमिता एकाक्षरा॥ अभिसंबोधि
विशुद्ध्या मध्येक कोष्ठक ब्रह्मस्थानं॥ सकारेण धर्म्मकायविशुद्ध्या मध्यचतुःकोष्ठकानि ब्रह्मस्थानं॥ सर्वेन्द्रियविशुद्ध्या मध्यनवकोष्ठकानि ब्रह्मस्थानं॥ तत ईशान्यपष्ठकोष्ठकानि
धृतराष्ट्र त्रायत्रिंस विरूढ विरूपाक्ष तुषित कुवेर निर्म्माणरतिदेवानां स्थानानि॥ तथा ईशान्यादि द्वादश कोष्ठकानि धृतराष्ट्र ब्रह्मकायिक त्रायत्रिंश विरूढक ब्रह्मपुरोहित॥ याम
विरूपाक्ष, महाब्रह्मा, तुषित, कुवेर निर्म्माणरति परिनिर्म्मितवशवर्त्तिनां देवानां स्थानानि॥ तथैव ईशादि षोडशकानि धृतराष्ट्र सुपरीत्ताभ ब्रह्मकायिक त्रायत्रिंश विरूढक, अ
प्रमाणाभ, ब्रह्मपुरोहित याम विरूपाक्ष आभास्वर महाब्रह्मा, तुषित कुवेर, परीत्तशुभ्र निर्माणरति परिनिर्म्मित वसवर्त्तिनां देवानां स्थानानि॥ तथा ईशानादि चतुर्विंशति
कोष्ठकेषु॥ प्रियंगु कांस आमलकी पूर्वविदेह नालिकेर श्वेत परास काक यव जंबु सिंहल वरद हरिकेल नग्न पार्श्व कास्ताम्र अपरगोदानीय नागवर्द्धमान

203 ष्टोत्तर शतवारं परिजपेत्॥ २ ॥दक्षिणकोष्ठके धान्य हरिताल सहदेव कंकमाना मुपरि रूप्य पद्मं तदुपरि सुवर्णा हयं तदुपरि पुष्परागं संस्थाप्य॥ त्रैंवात्रैं इत्यनेनाष्टो
त्तर शतवारं परिजपेत्॥ ३ ॥पृष्ठकोष्ठके रक्ततिलं हिंगुल सहदेवी कर्पूराणा मुपरि रूप्य पद्मं तदुपरि सुवर्णा मयूरं तदुपरि पद्मरागं संस्थाप्य॥ ह्रीः मं ह्रीः इत्यनेनाष्टो
त्तर शतवारं परिजपेत्॥ ४ ॥उत्तरकोष्ठके माषत्रकथ शिरिकर्णिका सिह्लकाना मुपरि रूप्य पद्मं तदुपरि सुवर्णा गरुड तदुपरि मरकट संस्थाप्य अकं अः अनेनाष्टोत्तर शत
वारं जपेत्॥ ५ ॥तद्बहिरष्ठकोष्ठकेषु पूर्वे सित तिलं रसाञ्जन अञ्जनामूलिका गुरूणा मुपरि सुवर्णा पद्मं तदुपरि रूप्य पद्मं तदुपरि शंखं संस्थाप्य॥ ॐ वज्र व
ज्रिणि हूं इत्यनेनाष्टोत्तरशतवारं परिजपेत्॥ ६ ॥दक्षिणे गुञ्जा नीलिको शीर॥ वालका नामुपरि सुवर्णा पद्मं तदुपरि रूप्य पद्मं तदुपरि राजावर्त्तकं संस्थाप्य॥ ॐ रत्नवज्रि
णि त्रां॥ अनेनाष्टोत्तरवारं परिजपेत्॥ ७ ॥पश्चिमे रक्तशालि धान्य सुवर्णा गैरिक लक्ष्मणा मूल रक्तचन्दनाना मुपरि सुवर्णा पद्मं तदुपरि रूप्य पद्मं तदुपरि विद्रुम

202 रत्न॰क मरङ्ग वर्द्धरोत्तरकुरुः चन्द्र सुवर्णद्वीपनिवासिनां मनुष्याणानि॥ विंशति कोष्ठकेतु कांश काकनग्नपार्श्वक कमरङ्गदीपान् परित्यज्य। षोडश कोष्ठकेतु श्वेनवर
द वर्द्धमान।सुवर्णद्वीपान्परित्यजेत्।तथैवप्रताचतुर्विंशति।अष्टाविंशति द्वात्रिंशत्कोष्ठकेषु चकटपूट नादि प्रेतानामवस्थानंवेदितव्या॥ तत्र त्रयाणाम ध्येय थाभि
प्रेतकरणीय॥ ततोरत्नशिलया छादयेत्। साचरत्नशिला पिण्डिकाप्रमाणात्रियवाधिकचतुरङ्गुलाद्धवाकार्या॥ तत्र रत्नशिला पृष्ठे त्रियवाधिक घडङ्गुलप
माणाचतुरस्र त्रयोदशकोष्ठकानिस्थानयेत्॥ तत्रदेवमनुष्ययोर्मध्ये मध्यम कोष्ठका।तद्वहिर्दिक्षु चतुः कोष्ठकानि। ततवहिर्दिक्षु विदिक्षु ष्टकोष्ठकानि तत्र १०१
पिमध्यमकोष्ठकेयव तारकाविमल वृहती सित चन्दनाना मुपरि रूप्यपद्म सुवर्णसिंह।तदुपरि वज्र संस्थाप्य आः सिंआ। अनेनाष्टोत्तरशतवारं परिज
पेत्॥ १ ॥तद्वहिपूर्वकोष्ठके गोधूम मनशिलाकराठकारिकस्तूरिकानाम पारे रुप्यप द्मतदुपरि सुवर्णवारिणां तदुपरि इन्द्रनील संस्थाप्य॥ हूं गं हूं इत्यनेना

204 संस्थाप्य ॐ धर्म्मवज्रिणि ह्रीः अनेनाष्टोत्तरशतवारं परिजप्येत्॥ ८ ॥उत्तरे सर्षपा मा॥ त्रिक मांसा विष्णुक्रान्ता नामुपरि सुवर्ण पद्मं तदुपरि रूप्य पद्म तदुपरि कनकं संस्थाप्य॥
ॐ कर्म्मवज्रिणि अः अनेनाष्टोत्तरशतवारंपरिजपेत्॥ ९ ॥ आग्नेये कुलत्थाभ्रक जानी फलग्रन्थिपलाना मुपरि सुवर्ण पद्मं तदुपरि रूप्यं पद्मं तदुपरि मौक्तिकं संस्थाप्य॥
ॐ वज्रलास्ये हूं अनेनाष्टोत्तरशतवारं परिजपेत्॥ १० ॥ नैऋत्या अतसी प्रियङ्गु भद्यरक सोमकानामुपरि सुवर्णपद्मं तदुपरि रूप्यपद्मं तदुपरि भीष्मकं संस्थाप्य॥
ॐ वज्रमाल्ये हुं।अनेनाष्टोत्तरशतवारंपरिजपेत्॥ ११ ॥वायव्ये कृष्ण तिल सिंदुर सूक्ष्मेल सुरभीणामुपरि सुवर्ण पद्म तदुपरि रूप्य पद्म तदुपरि वैडुर्य संस्थाप्य॥ १०२
ॐ वज्रगीते ह्रीं॥अनेनाष्टोत्तरवारंपरिजप्येत्॥ १२ ॥ऐशान्यस्यामाक. वङ्गल. वङ्काष्ठ पद्मासनामुपरि सुवर्णपद्मं तदुपरि रूप्य पद्म तदुपरि स्फटिकं संस्थाप्य॥ ॐ वज्र नृत्य
अः॥ अनेनाष्टोत्तरशतवारं परिजपेत्॥ १३ ॥ शीलस्कन्धविशुद्धा रत्नानि॥ समाधिस्कन्ध विशुद्धा उषधयः॥ प्रज्ञा स्कन्ध विशुद्धा धान्य॥ विमुक्ति स्कंध विशुद्धा गन्धा॥

205 विमुक्तिज्ञानदर्शनस्कन्धविशुद्ध्या वीजस्य स्थापनं ॥ ५ ॥ वज्रभूमिविशुद्ध्या वज्रस्य स्थापनं ॥ १३ ॥ ज्ञानवतीभूमिविशुद्ध्या इन्द्रनीलस्य ॥ १२ ॥ समन्तप्रभाभूमिविशुद्ध्या
पुष्परागस्य ॥ ११ ॥ धर्ममेघाभूमिविशुद्ध्या पद्मरागस्य ॥ १० ॥ साधुमतीभूमिविशुद्ध्या मरकतस्य ॥ ९ ॥ अचलाभूमिविशुद्ध्या शंखस्य ॥ ८ ॥ दूरङ्गमाभूमिविशु
द्ध्या सुवर्णस्य ॥ ७ ॥ अभिमुखीभूमिविशुद्ध्या राजावर्त्तस्य ॥ ६ ॥ सुदुर्ज्जयाभूमिविशुद्ध्या विद्रुमस्य ॥ ५ ॥ अर्च्चिष्मतीभूमिविशुद्ध्या स्फटिकस्य ॥ ४ ॥
प्रभाकरीभूमिविशुद्ध्या वैडूर्यस्य ॥ ३ ॥ विमलाभूमिविशुद्ध्या भीष्मस्य ॥ २ ॥ प्रमुदिताभूमिविशुद्ध्या मुक्तायाः ॥ १ ॥ प्रज्ञोपायविशुद्ध्या सुवर्णरूप्यपद्मयोः ॥
सर्वेषामुपरि ताम्रपट्टिकया आच्छादयेदिति रत्नन्यासविधिः ॥ ॥ इदानीं पिण्डिकालक्षणमभिधीयते ॥ स्थाप्यमानदेवस्य सार्द्धसप्ततालप्रमाणा दैर्घ्येन पिण्डिकाया
मः ॥ व्यायामतः पादोनपञ्चतालप्रमाणा सार्द्धचतुस्तालम्वा ॥ आयामस्यार्द्धेनोद्वेधः ॥ अत्रोद्वेधस्य कथनं सामान्यतः ॥ विशेषतस्तूद्वेधस्य नियमः ॥ द्वारमध्यं निरीक्ष्य

207 ष्ठितः तत्परिणामेन वैरोचनरूपं तत्परिणामेन कूटागारं विहारं विभाव्य ॥ वज्रप्राकारादिसीमावन्धादिकं कृत्वा ॥ ॐ हूं ह्रीः भ्रूं खं वज्री भव दृढस्तिष्ठ भ्रूं खं ॥ अने
नाष्टोत्तरशतवारमधिष्ठानं कृत्वा ज्ञानसत्त्वमाकृष्य प्रोक्षणार्घादिकं कृत्वा यन्मङ्गलेत्यादिगाथापाठपूर्वकं कलशजलैरभिषिंच्य पुष्पादिभिः संपूजयेत् ॥
ॐ सुप्रतिष्ठितवज्रे स्वाहा ॥ अनया सप्तवारमधिष्ठानं कुर्यात् ॥ ये धर्मा इत्यादिगाथाभिश्च प्रतिष्ठां कृत्वा शताक्षरेण द्रढीकुर्यात् ॥ महावलिञ्च प्रचारयेत् ॥
॥ इदानीं प्रतिमास्थापनाय तल्लक्षणमुच्यते ॥ तत्र सर्वासां प्रतिमानां द्वादशमात्रिकं मुखं ॥ तत्तुल्यं व्यायामः ॥ तिलचूतखगरुडवकाराकृतिभेदेन च
तुर्विधमुखं संस्थानं ॥ त्रिमात्रिकद्विमात्रिकसार्द्धद्विमात्रिकेन मात्रिकेरनुक्रमेण कपालेषु विवर्ज्जयेत् ॥ न च स्त्रीरूपाणां मेव तिलाकृतिमुखं ॥ मात्राष्टभागक
भागेन यवकः ॥ चतुर्म्मात्रिकः ॥ शिरोभागस्तेन छत्राकारः ॥ सार्द्धचतुर्म्मात्रिकं ललाटं ॥ तिर्यग्दशमात्रिका ॥ द्वियवाधिकचतुर्म्मात्रिका नासिकायामः ॥ द्वियवोऽग्रवि

206 दिवस्यस्थापनात्॥ तथाहि योगह्यमध्येदेवः॥ ससौभाग्यप्रदः॥ नाभिमध्योऽर्थदः॥ हृदयमध्यो धर्म्मप्रदः॥ प्रज्ञापदः कराठमध्यः॥ तुराणामध्यस्तुमोक्षदः॥ पिरिडकामा
पनस्थानं सिंहपट्टिका॥ यथाशोभञ्च वराणाद्विशेषशतिनिषराास्या॥ उत्थितदेवस्यकनखिभागेद्विभागप्रमाराांकुर्यात्॥ ॥शुभतिथिनक्षत्रवारवेलासुदेवमनुष्य
योर्मध्येपिरिडकास्थापयेदिति॥ ० ॥इदानी विहारप्रतिष्ठोच्यते॥ तत्रनिष्पन्नविहारे लेपकर्म्मकृत्वाशुभ्ररङ्गरंजयित्वादेवादि नानालंकारालेखैर्विचित्रैर्म्मराडयेत्
पटलानांप्रान्तेषु विजयवलिकिनी विविक्तानि चावलम्बयेत्॥ पञ्चसूत्रसर्षपपोट्टली बोधिवृक्षपर्णावलीदूर्वांकुराउपुष्पमालाभिश्च वहिर्भित्तोपरिवेष्टयेत्॥ तत्र
ॐ स्वभावशुद्धाः सर्वधर्माःस्वभावशुद्धोऽहं॥ इत्युच्चार्यआकाशोपमम्विभाव्य॥ यंकारेणवायुमराडलं॥ रंकारेणाग्निमराडलं॥ वंकारेणामहासमुद्रं॥ तन्मध्येपीत १०३
लंकारेणचतुरस्रपीतमाहेन्द्रमराडलं॥ तदुपरिसुंकारेणचतुरत्नमयसुमेरुंविभाव्य॥ तदुपरिहुंकारेण विश्वक्वज्रमयीं विभाव्य॥ तन्मध्येसितभुंकारेण चक्रं भूंकाराद्वि

208 विस्तारः॥ निष्काशः सार्द्धकमात्रिकः॥ द्विमात्रिकं विस्तारः॥ त्रिमात्रिकं पार्श्वयोरुर्द्धः॥ नाशावंसोयवत्रयं॥ वशरंध्रयवद्वयं॥ तिलपुष्पसदृशाकार्या॥ तदधोभागःपादाधिक
त्रिमात्रिकः॥ तत्रभोयंककषयवं॥ तत्तुल्पमधरं॥ मात्रिकाद्वयेन विस्तारः॥ अर्द्धमात्रिकमुत्तरोष्ठं॥ तदुपरिसार्द्धद्वयप्रमाराागोजा॥ षयवमधरनिष्काशं॥ तन्म
ध्येविंवरेखा॥ मात्रिकार्द्धेनश्रृक्कनी॥ द्वियवाद्विकैकमात्रिकेनचवुकायामः॥ तिर्यक्द्विमात्रिकः॥ द्विमात्रिकोकर्णविस्तारो॥ चतुर्म्मात्रिकाव्यायामो॥ पृष्ठेद्विमात्रिकनि
ष्काशौ॥ द्विमात्रिके भ्रूटिके॥ तदर्द्धेनकक्तुनी॥ कर्णावर्त्तेयवद्वये॥ श्रोत्रं रध्रंत्रियवै॥ तत्समाकर्णागेहे॥ माशिकेकर्णनालेच यथाशोभं॥ उभयोः कर्णयोर्म्मध्येमस्तकोः
ष्टादशमात्रिकः॥ पृष्ठेतुदशमात्रिकां॥ भ्रूवोन्तरेचतुर्यवं॥ भ्रूवोर्दीर्घःपञ्चमात्रिको॥ भ्रूरेखायवार्द्धः॥ साचचापसदृशा॥ चतुर्म्मात्रिकोनेत्रायामो॥ सपादाधिकोकमा १०४
त्रिकोव्यायामो॥ एकमात्रिकान्तरो॥ तत्त्रिभागो असितभागो॥ आकारस्तुकमुदोत्पलपद्मपत्रमीनोदरेसमं॥ नेत्रान्तरौ द्विमात्रिकः॥ भ्रूरेखानेत्रान्तरो द्विमात्रिको॥

209 ललाटनेत्रचिबुकानिष्कासनःसमाः॥श्रृङ्कनितारकापार्श्वयोःसमसूत्रं॥कर्णाशीर्षभ्रूरेखयोःसमसूत्रं॥त्रुटिकानेत्रमध्ययोःसमसूत्रं॥मुखनिष्कांशंचचतुर्म्मात्रि
कः॥तत्समोग्रीवायामः॥स्कन्धमूलात्कर्णामूलंषण्मात्रिकं॥चिबुकाधो यथाशोभ समासवर्त्तिकाकार्या॥करीटिजियजुटत्रिशिखपञ्चशिखमौलिचूडामणिनाप्रम
णमष्टमात्रिकानोनाधिकंकर्त्तव्यं॥किञ्चित्प्रहर्षितंमाधुर्य्यलवनान्वितंशुभकारिवदनं॥कटुतिक्तकषायाम्लतोद्वेदनान्वितमशुभकारि॥शास्त्रलक्षणमन्तरेणमुख
कररो॥यजमानानजीवनि॥शास्त्रलक्षणोनमुखकरणोजनधनविजयायुर्ल्लक्ष्मीनां विवृद्धिः॥ ॥इदानींदेहानांमानमुच्यते॥तत्राहिक्काधोनाभिपर्य्यन्तंद्विनालं॥नाभे
रधोवृषणं॥मूलंयावदेकनालं॥हिक्वनिर्यक्पार्श्वौहिक्वानस्थूचूकमध्यंचूचुकयोरन्तरञ्चग्रीवापार्श्वतोभुजशीर्षञ्चनेषांप्रमाणंनालमेकं॥चूचुकनाभ्योरन्तरंचतु
र्दशमात्रिकं॥हिक्वांशाग्राणांसमसूत्रं॥अंसयोर्मध्येविस्तारोमुखत्रयं॥अक्षंकक्षंसेनकक्षयोरन्तरञ्चषण्मात्रिकं॥द्विमात्रिकंचूचुकामण्डलं॥यवद्वयंचूचुकन्तु॥

211 अर्द्धयवोन्नामध्यमाः॥एकमानकौअनामिकाप्रदेशिन्यौ॥कनीयस्यासप्तयवः॥मणोर्वन्धात्कनिष्ठामूलं पञ्चमात्रिकं॥तत्समःकरतलस्यायामः॥मणिवन्धादङ्गुष्ठ
मूलंचतुर्म्मात्रिकं॥तर्ज्जनीमूलादङ्गुष्ठमूलंत्रिमात्रिकं॥द्विपर्वणावङ्गुष्ठकौ॥त्रिपर्वाणःशेषाङ्गुल्यः॥सर्वासांपर्वाणि समानि॥अङ्गुल्यसूक्ष्माग्रसुसन्धिबद्धवर्त्तिनाश्च
करणीयाः॥स्वस्वाङ्गुलीनामर्द्धेननखानांतिर्यक्॥पर्वार्द्धेनदीर्घः॥नखानांमूलेचन्द्ररेखाकार्या॥करतलपार्श्वस्योर्द्धे धोद्विमात्रिकः॥शुभरेखोपशोभितंसमकर
तलंकार्यात्॥अत्रशुभरेखाः॥शंखचक्रपद्मध्वजवज्रस्वस्तिककलशनंद्यावर्त्तकुण्डलवस्त्रशशित्रिशूलवसुछत्रश्रीवत्सयवमालीचामरमीनौ कशायाकृनय॥
सांप्रतंपरिणाहानाप्रमाणमुच्यते॥तत्रषड्विंशतिमात्रिकंशीर्षस्यपरिमण्डलं॥ग्रीवायाविस्तारोष्टमात्रिकः॥तत्रिगुणंपरिमण्डलं॥वक्षयोर्म्मध्येविस्तारोद्वि
शतिमात्रिकः॥परिहत्तुमात्राद्वयेनाम्भःपञ्चनालं॥पञ्चदशमात्रिकउदरस्यमध्यविस्तारः॥तदधःषोडशमात्रिकोनितंबः॥अष्टादशमात्रिकाकटी॥एकनाल

210 नाभिमण्डलंत्रियवं॥दक्षिणावर्त्तनिम्नणाभिः॥निम्नंवद्द्विमात्रिकः॥वृषणौत्रिमात्रकौ॥चतुर्म्मात्रिकंमेढ्रं॥शोभनपीनवृत्तयोः स्फिचयोरुद्धमध्यमात्रिकं॥ना
भिगुह्ययोर्मध्येतुरुमूलं॥नालद्वयायामोजंघोरुणांप्रमाणं॥चतुर्म्मात्रिकेजानुनी॥द्विमात्रकौगुल्फौ॥चतुर्म्मात्रिकौपार्ष्णिकौ॥पादयोस्तिर्यक्सप्तमात्रि
कआयामेनदशमात्रिकौ॥सार्द्धद्विद्विमात्रिकः॥ ॥पादाङ्गुष्ठयोरायामः॥तत्समेसूचिकेद्वियवोन्नेमध्यमे॥अनामिकेत्रियवोन्ने॥कनीयस्योद्विमात्रिके
एकादशयवाअङ्गुष्ठयोर्विस्तारः॥अङ्गुष्ठसूच्योरग्रेऽन्तरंत्रियवं॥सूचिकयोर्व्यायामोनवयवौ॥मध्यमयोःसार्द्धाष्टयवौ॥अनामिकायाएकमात्रिके
कनीयस्योःसप्तयवा॥आभिन्नवच्चूनसंनिभाअङ्गुल्यः॥नखास्त्वर्द्धचंद्रोपमाः॥समपादतलौ॥बाहोर्दीर्घौषोडसमात्रिकौ॥प्रबाह्वोरष्टादशमात्रिकौ॥षण्मात्रकः॥ १०५
करतलं॥तत्समामध्यमाङ्गुली॥चतुर्म्मात्रिकोऽङ्गुष्ठः॥तत्समाकनीयसी॥अनामिकाप्रदेशिन्योत्रियवान्नषण्मात्रके॥अङ्गुष्ठस्यव्यायामोयवाधिकेकमात्रिकः॥तस्या

212 मूलमध्यं॥षण्मात्रकंजंघामध्यं॥चतुर्म्मात्रिकंजंघान्ते॥एतेषांस्वस्वविस्तारत्रिगुणेनपरिमण्डलं॥तथैवसर्वाङ्गुलीभिः॥भुजयोर्मूलमध्याग्रेअष्टषट्चतुर्म्मात्रिकं॥
स्वस्वविस्तारेणत्रिगुणंपरिमण्डलं॥द्विमात्रिकंपृष्ठतःशिरोनिष्काशं॥पृष्ठहिवयोःसमसूत्रं॥उरःपिण्डिकायाष्णिसमसूत्रं॥ ॥प्रतिमायारूपगुणाउच्यंते॥ग्रा
स्वोक्तलक्षणायामध्यायामयुक्ताप्रतिमा॥स्थानस्थिरत्वसत्कारकाः॥छत्रोपमशिरश्चधनधान्यसमृद्धिदा॥भूरेखालल्लाटविस्तीर्णाविस्तरश्रीपदा॥शोभननासिका
प्रजानांसुखप्रदा॥सिंहहनुकपोलीमहाभोगप्रदा॥सुसंस्थानचिबुकमुखामिष्टान्नपानभोजनप्रदा॥सुकर्णापत्रनालावाऽश्रुन्यकरी॥सुग्रीवासर्वसिद्धिदा॥सिंहवा १०६
हुबलवीर्यकरी॥करिकराकारभुजासर्वकार्यप्रसाधिकाः॥सस्यसंपत्तिवर्द्धनीसिंहसंस्थाशरीरा॥सुदराक्षभिक्षकृता॥पशुवर्द्धिकारंभानिभोरू॥एणायतुल्यजंघाग्रा
मपुत्रादिवर्द्धिका॥सुसंस्थितपाणशीलविद्याप्रवर्द्धनी॥ ० ॥इदानींदोषोऽभिधीयन्ते॥पाणिपादशरीराङ्गहूस्वादुर्भिक्षराष्ट्रभङ्गकरी॥विस्ताहीनाप्रजा

213 दुर्भिक्षप्रदा॥ कुब्जकरी देहहीना॥ नासिकाहीना व्याधिकरी॥ अल्पाक्षामराउला क्षा केकराक्षी चार्थनाशकृत्॥ हीनदृष्टिरधोदृष्टिः सर्वकार्यार्थनाशकृत्॥ नासिकाकरा
नेत्रांगुली ह्रस्वा सिद्धिसंपत्तिहानिकृत्॥ ग्रीवाचिबुकजंघादीर्घा उच्चाटस्थानभ्रंशना॥ सन्धिनखकटिस्थूला दुःखप्रदा॥ कपोलजंघापादस्थूला विघ्नकृत्॥ उरोगण्डोद
रनिम्नोद्भव्यभोगविनाशकृत्॥ कर्णशिरःस्तनवंकाकलुकाया सशत्रुपीडाकृत्॥ कायोरस्थलहीन चौरमरणादिभयं॥ ऊरुहीनावेशोद्वेदिका॥ नासिकाशिरः कर्णसूक्ष्मा
मारोपद्रवविघ्नाग्निभयप्रदा॥ बाहुभुजापकृस्वाशोकसन्तापदुःखदा॥ संध्यासनभिनादुःखसंनाशकृत्॥ नेत्रोष्ठनासिकानाभाबनःसामर्थ्यहीनाशोकविघ्नवर्द्धनी॥ पिण्डिकावि
स्तरापाश्रयछत्रसङ्कनान्संपदग्रेशः॥ मरणामप्रियसमागमः॥ प्रियवियोगश्चा॥ इतिनवतालप्रतिमालक्षणं॥ ॥ दशतालादीनालक्षणांसंक्षेपतस्त्वोच्यते॥ तत्रशिरो
भागमात्रा॥ मुखमात्रा १२ ग्रीवामात्रा ४ देहमात्रा २६ नितंबमात्रा ४ कटीमात्रा ५ ऊरुमात्रा २६ जानुमात्रा ५ जंघामात्रा २६ गुल्फमात्रा २ अधोभागमात्रा ५ हिक्काशाग्र

215 करपल्लवमात्रा ८ मात्रासमूह ७२ यवसंख्या ३७६ इति षडतालं सेनापतिलक्षणं॥ ॥ शिरोभागमात्रा ३ मुखमात्रा १२ ग्रीवामात्रा २ देहमात्रा २१ ऊरुमात्रा १३ जानुमात्रा २
जंघामात्रा १३ गुल्फमात्रा १ पाष्णिमात्रा २ मात्रासमूह ७२ यवसंख्या २७६ इति षडतालस्यलक्षणं क्रोधरूपस्य॥ ॥ शिरोभागमात्रा ४ मुखमात्रा १२ ग्रीवामात्रा ३ देहमात्रा १२ ऊरु
मात्रा १२ जानुमात्रा २ जंघामात्रा ११ गुल्फमात्रा २ पार्ष्णिमात्रा ३ मात्रासमूह ६० यवसंख्या ४८० इति पञ्चतालंलक्षणं डाकिनीरूपं॥ ॥ शिरोभागमात्रा १ मुखमात्रा १०
ग्रीवामात्रा १ देहमात्रा १२ नितंबमात्रा १ ऊरुमात्रा ९ जानुमात्रा १ जंघामात्रा ९ गुल्फमात्रा १ पार्ष्णिमात्रा २ हिक्काशाग्रमात्रा ८ बाहुमात्रा ६ प्रबाहुमात्रा ८ करपल्लवमात्रा ७
मात्रासमूह ४८ यवसंख्या ३८४ इति चतुस्तालं लक्षणं वामनरूपं॥ ॥ शिरोभागमात्रा २ मुखमात्रा १२ देहमात्रा १२ ऊरुमात्रा ९ जानुमात्रा १ जंघामात्रा १० गुल्फमा
त्रा १ पाष्णिमात्रा १ मात्रासमूह ४८ यवसंख्या ३८४ इति चतुस्तालंलक्षणं बालरूपस्य॥ ॥ मुखमात्रा १२ देहमात्रा १२ ऊरुजंघाजानुनांमात्रा १२ इति त्रिताल

214 मात्रा१८ वाहुमात्रा १८ प्रवाहुमात्रा१९करपल्लव मात्रा१२मात्रासमूह १२०यव संख्या९६० इति बुद्ध ब्रह्मा चर्च्चिका ऋषि ब्रह्म राक्षसानां दशतालप्रमाणं॥ ० ॥
शिरोभागमात्रा२मुखभागमात्रा१२ग्रीवा मात्रा ३देहमात्रा २१ नितम्ब मात्रा३ कटी मात्रा २उरुमात्रा२२ जानुमात्रा३पिण्डि मात्रा२२ गुल्फमात्रा १॥ अधोभागमा
त्रा२ हिक्कांशाग्रमात्रा१२वाहुमात्रा१४ प्रवाहुमात्रा१६ करपल्लवमात्रा१२ मात्रासमूह९६ यव संख्या७६८ इति देवीलक्षणामष्टतालस्य॥ ॥ शिरोभागमात्रा २
मुखभागमात्रा१२ग्रीवामात्रा३देहमात्रा१९ नितम्बमात्रा १कटी मात्रा२उरुमात्रा१९जानुमात्रा३जंघा मात्रा१९ गुल्फमात्रा१पार्ष्णिमात्रा २ हिक्काशाग्रमात्रा १७ १०७
वाहुमात्रा१२ प्रवाहुमात्रा१४करपल्लवमात्रा१० मात्रासमूह ८४ यवसंख्या ६७२ मानुषस्य प्रमाणं सप्ततालमिति॥ शिरोभागमात्रा२मुख मात्रा१२ग्रीवा मात्रा
१२देहमात्रा१६ नितंबमात्रा१कटीमात्रा२उरुमात्रा१६जानुमात्रा२जंघामात्रा१६ गुल्फमात्रा १ पार्ष्णि मात्रा२ हिक्काशाग्रमात्रा१५ वाहुमात्रा१० प्रवाहुमात्रा १२

216 लक्षणविनायकस्य॥ ॥कौसुमी। सार्वगन्धी। चांदनी। दीर्वा। शैली। लौही। त्रापुसी। वांगी। लोही। पञ्चलोही। सार्वलोही। तांम्री। कांसी। पैत्तली। राजती
सौवर्णी। सर्वरत्नमयी। स्फाटिकी। शालिभक्षमयी। मृत मरीच प्रतिमा। यथासंख्यं। मोक्षं। वश्यं। मोक्षायुषं। सिद्धिराज्यायु सामर्थ्यं॥ शत्रुनाशने। क्षुद्राभिचारकर्म्ममार
णं॥ धनासमे॥ सर्वकामार्थ सिद्धिं। उच्चाटनं। पुष्टिं। शान्ति। भुक्तिमुक्ति सर्वसंपदो। सर्वसंपदाक्षं। मोहनंप्रज्ञावस्तविवर्द्धनकरोति॥ ० ॥इदानीं पटफलक प्रति
मादीनां दशक्रिया अभिधानीया॥ तत्र ब्रह्मक्षत्रियवैश्य सूद्रजातिभिः सित पीत रक्त कृष्णा भातिः कुमारीभिः कर्त्तितैर्पीरमूल्य क्रीतैर्वा सूत्रैः सिद्धकर्प्पटे क्रियाचर्या १०८
योगतंत्रोक्तं देवतालिखनयोग्यवलि दान पुरःसरं समाधित्रययोगवानाचार्यो ध्यानालये॥ ॐ नमः समन्तवुद्धानां सम्बोधनी विशुद्धानां सर्वविघ्न हरंतु हूं२फट्
स्वाहा॥ इति मंत्रेण॥ ॐ हूं त्रां ह्रीः अः इति मन्त्रेण॥ धितिष्ठैः पंचामृतः पंचगव्ये सौर्गोधदक परिपूरित सार्व्वकर्म्मिक कलशजलेन सुधौत कर्प्पटे। योगोत्तरयो

217 गिनीनिरुत्तरतंत्रोक्तदेवतालिखनेतु संग्रामपतिते वीरकर्प्पटे॥ रजस्वलारजोरंजितं जितकर्प्पटे॥ स्मशानकर्प्पटे॥ नरचर्म्मणि॥ कपालकेवा॥ श्मशानभस्ममघक
लशोदके प्रक्षालिते शून्यताकरुणाभिन्नबोधिचित्तात्मके सर्वतथागतान् प्रवेश्य पाद्यं दत्वा पुष्पादिभिः संपूज्य पंचतथागतवीजाधिष्ठितेन वज्रमषिं गृहीतेन पंच
सूत्रेण॥ यथाविधिनासूत्रयेत्॥ ततः कर्म्मवज्रात्मकश्चित्रकरो रवीन्दुस्थवज्रपद्माङ्कितदक्षिणोत्तरकरः॥ दक्षिणहस्तेन पंचज्ञानात्मकवर्त्तिकां गृहीत्वा रेखादिकं
लिखेदिति॥ ॥पटस्य॥ ॥पुस्तकलिखनेतु बलिपूजापुरःसरं लेखकममिताभरूपं विचिन्त्य तद्धृत्कण्ठमूर्द्धसु यथाक्रमं॥ वज्रपद्मचक्रस्थान्
हूं आः ॐ अनेन हृदादिकं स्पृशनधिनिष्ठेत्॥ वामदक्षिणाकरयोश्च चन्द्रसूर्योपरि जलज वज्रं कृटिति ध्यात्वा हूं आः ॐ॥ ततः स्वयंच ताडीपत्रे तूलीपत्रे भू
र्ज्जादौ वाभावितधीःकारकरातीतं वाग्वज्रमक्षराकारपरिणतं विचिंत्य॥ ॐ वज्रसत्व हूं इत्यनेनाष्टोत्तरशतवारं परिजप्य॥ ॐ वज्रयक्ष हूं इति वा॥ मसीञ्च

219 वस्त्रावशीकृत्य कलशोदकेन च स्नापयित्वा पञ्चभिरुपचारैः संपूज्य॥ ॐ वज्रसत्व हूंः अनेन वज्रसत्वसमयमुद्रां दर्शयित्वा॥ ॐ वज्रावेश हो॥ अनेन वज्रावेशसमयमुद्रां वज्रासनाक्षरेण
स्थिरीकुर्यात्॥ अत्रापि पूर्ववत् कुलाधिपतिस्वभावस्य शिल्पिनः कराधिष्ठानं तस्मै तिलकतांबुलादिकं दत्वा समर्पयेत्॥ प्रेक्षकजनाश्च तांबुलादिभिः सन्तोष्य श्रेयसभोजनं बलिश्च
देयः॥ ततो भाविकदेवतां विसर्ज्ज्य यजमानायाशीर्वादं दद्यादिति॥ ॥योनिसंशोधनं सांप्रतमयोमयी यच्चिन्हदेवस्य सारभूतां घटयित्वा तद्वीजं सुवर्णपत्रे विलिख्य
हृदयप्रदेशे नियोज्य कुमारीकर्त्तितसूत्रेण निबध्य वहिः मृत्तिकाभिर्लिवेशनञ्च कारयेदाचार्यः॥ ॥ततो गगनतले चन्द्रमण्डलस्थरक्तःहोःकारद्वयगर्भितं त्रितत्व
सहितं देवतावीजं दृष्ट्वा॥ यथाहि सर्वसंबुद्धास्तुषिते संप्रतिष्ठिताः॥ मायादेव्याश्च धातुकुक्षौ तद्वनिषेद्धिहाकृतौ॥ समन्वाहरन्तु मां बुद्धा अशेषादिक्षु संस्थिताः॥
अमुकोहं नामवज्री देवताकल्पयाम्यहं॥ शिष्यानामनुकंपाय सत्वार्थप्रतिहेतुना॥ वीजमूर्त्तं महज्ञानमधिष्ठाकर्त्तुमर्हयेति त्रिपठित्वा ऽर्घ्यपूजयित्वा खड्गवीज

218 प्रज्ञाज्ञानात्मिकांवज्रांगुपरिणामेनज्ञानामृतरूपंविभाव्य॥ॐवज्रधर्म्म ह्रीःस्वाहेति मन्त्रेणाष्टशतवारं परिजपेत्॥लेखनीपरमाग्र वज्रं विचिंत्य॥ॐधीःश्रुतिस्मृतौ
विजयेसर्व्वाज्ञानपटलापहारिणि ह्रीःस्वाहेति मन्त्रेणचैकविंशतिवारमभिमंत्र्यलेखकायसमर्प्पयेत्॥लेखकोप्यक्षरावलिमालिखेत्॥ततःसताक्षरेण दृष्टीकुर्यादि
ति॥पुस्तकस्य॥ ॥प्रणिमाकरणेतु बलिपूजापूर्वकंइमं विज्ञानितं करिष्यमाणदेवस्याधिपतिरूपंध्यात्वा पूर्व्ववद्यथाक्रमं हृदादिषु हूँ आः ॐकारदृष्टान्तैरेववी
जैरधिनिष्ठेत्॥ततःपवित्रमालिन्यादिकं रूपैर्निःशून्यताधिमोक्षो हृद्बीजकरिष्यमाणांदेवतारूपंविचिंत्य॥तथागतोयत्स्वभावं तत्स्वभावंदिमिदंजगत्॥तथागतोनि
स्वभावोनिःस्वभावमिदंजगत्॥अनयावस्तुशुद्धीकरणंकृत्वा॥नभसि सर्वतथागतान् दृष्ट्वा पुष्पादिभिःसंपूज्य लास्यादिभिश्चकृत्वा सान्निध्यंकुर्यात्॥खव्यापि १०९
सर्वसंबुद्धबोधिसत्वाश्च सर्व्वगाः इहैवाद्यकृतावासेसान्निध्यं कर्त्तुमर्हथेतिपठित्वा॥ततोभविष्यद्देवताहृन्मंत्रेणाष्टोत्तरशतंवारं मधिष्ठायज्ञानसत्वमाकृष्य प्रवेश्य

220 रश्मिभिःॐवज्रांकुश बीजमाकर्षयजः॥ॐवज्रपाशबीजं प्रवेशयहूँ॥ॐवज्रस्फोटबीजंबन्धयवं॥ॐवज्रावेश बीजंतोषयहोइति मन्त्रेणकर्पणादिकंकृत्वा॥समयस्त्व
समयमहामिति त्रिरुच्चार्याधिवासयेत्॥ततःस्वस्वबीजेनदेवतानिष्पादनमेवरुपंसवनमिति ज्ञात्वा॥मंत्रंचसंजप्य सताक्षरंचोच्चारणंकृत्वा विधिना पूजयित्वा बलिं
दद्यादिति॥पुंसवनं॥ ॥संप्रतिवितानच्छत्रध्वजपताकाकुसुमादिभिः॥स्नानवेदीमलकल्पनतन्मध्ये विश्वदलकमलमभिलिख्य॥अथवापिष्टातवैरष्टदलकमल
मभिलिख्यतद्वहिरष्टौकलशानिस्थापयेत्॥तत्रऐशान्यांमहावैरोचनः॥सत्ववज्री रत्नवज्रीधर्म्मवज्रीकर्म्मवज्रीणांपञ्चचिन्हाङ्कितकलशमेवं॥ १ ॥पूर्वस्याम ११०
क्षोभ्यवज्रसत्व वज्रराज वज्रराग वज्र वज्रसाधुनापञ्चचिन्हांकितकलशमेकं॥ २ ॥आग्नेयवज्रलास्या वज्रमाला वज्रगीता वज्रनृत्या वज्रधूपा वज्रपुष्पा वज्रदी
पा वज्रगंधानामेषुचिन्हांकितकलशमेकं॥ ३ ॥दक्षिणस्यां रत्नसंभव वज्ररत्न वज्रतेज वज्रकेतु वज्रहासानां पञ्चचिन्हांकितकलशमेकं॥ ४ ॥नैरृत्यांवज्रा

221 ङ्कुश वज्रपाश वज्रस्फोट वज्रावेशानां चतुश्चिन्हांकितं कलशमेकं ॥ ५ ॥ पूर्वतो अमिताभ वज्रधर्म वज्रतीक्ष्ण वज्रहेतु वज्रभाषाणां पञ्चचिन्हांकितं कलशमेकं ॥ ६ ॥
वायव्ये मैत्रेय अमोघदर्शी सर्वापायंजह सर्वशोक तमोनिर्घातन मति गन्धहस्ति सुरङ्गम गगनगञ्ज ज्ञानकेतु अमितप्रभ चन्द्रप्रभ भद्रपाल जालिनीप्रभ वज्रगर्भ अक्षय
मति प्रतिभानकूट समन्तभद्राणां षोडशचिन्हांकितं कलशमेकं ॥ ७ ॥ उत्तरस्यां नमो अमोघसिद्धि वज्रकर्म वज्ररक्ष वज्रयक्ष वज्रसन्धीनां पञ्चचिन्हांकितं कलशमेकं ॥ ८ ॥
लिखिताष्टदलकमलकर्णिकोपरि पीठिकायां चन्द्रमण्डले ॥ पट्टादिष्वादिनेसिंहासनेषु निषद्याधिमोक्षेण ॥ स्नानमण्डलं रहितेवा ॥ तथान्यथा च पीठादौ भावितनन्मण्ड
लेपटपुस्तकचैत्यादिकं पूर्वाभिमुखं स्वामन्यत्सुखं स्वास्थापयेत् ॥ यत्तु स्थानान्तरं संचारयोग्यं न भवति विहारस्थं चैत्यगन्धकूटी प्रतिमादिकं न तस्य स्नानवेद्यां प्रयोजनमुभय
यथा प्रदोषसमये प्रतिमादिकं पुरस्कृत्य तदभिमुखीभूय पाद्यार्घादिदानपुरःसरं ॥ अर्घादिदानमन्त्रेणा वा नीराजयेत् ॥ नीराजनमन्त्रास्तथ्यग्निक्रियायामुक्ताः ॥ ततः प्रतिमा

223 प्रलिप्य वज्राङ्कुशादिमन्त्राभिः जप्तकलशजलैर्मङ्गलगाथया स्नापयेत् ॥ आकर्षपाशनिगडोन्मथ राग हस्ते राकर्षणादिविविधार्थं स्वकर्मयुक्तैः ॥ धाराधिपयदपि
गीतमनन्यपूज्यं तन्मङ्गलम्भवतु ते परमाभिषेक इति ॥ ततः कांस्यस्थ हरिद्रया प्रलिप्य स्नापयित्वा श्रीखण्डरक्तचन्दनकुंकुमादि ग्रन्थिपर्णीका गुरु कर्पूर कस्तूरिका
दिभिः समालभ्यः ॥ हृद्बीजकिरणाकृष्टाभिः ॥ सत्ववज्र्यादिदेवीभिः कलशधारिणीभिर्मङ्गलगाथापूर्वकं कलशजलैः स्नाप्यमानं देवं ॥ यथा हि जातमात्रेण स्नापिताः
सर्वतथागताः ॥ तथाहं स्नापयिष्यामि शुद्धदिव्येन वारिणेति पठन् स्थापयेत् ॥ तत्वाम्भोदकमृडुकरेण ॥ आकर्षयेत् ॥ तदनु हूं जः वज्रजित् आचार्यः सुरभिकुसुम
बद्धाञ्जलिः प्रणतः ॥ ॐ सर्वतथागत सुलालित विनासनमिनेत्रमामिर्भगवन्त श्री अमुकवज्र जः हूं वं होः प्रतीच्छ कुसुमाञ्जलिनाथ होः समयस्त्वं समयस्त्व मित्युदीरय
न् पुष्पाञ्जलिं क्षिपेत् ॥ ततो दक्षिणं जानुमण्डलं पृथिव्यां प्रतिस्थाप्य तमपि प्रतिसत्यं प्रार्थयेत् ॥ भगवन्नमुकसद्वज्रविद्याराजनमोस्तुते ॥ कर्तुमिच्छामि तेनाथं प्रति

222 याहन्कराठमूर्द्धसु हूँआः ॐकारोच्चारणापूर्व्वकमुपस्पृश्य हृदिगन्धचन्दनत्वा शिरसिपुष्पमालयासंवेष्टापरतो ऽर्घदत्वादीपञ्च परिभ्राम्या। ॐ वज्रयक्ष हूं॥ अनेन सप्त॥ भ
मन्त्रिनघृन सर्ज्जरसधूपेन धूपयेदितिनीराजनक्रमः॥ नदनुवज्रकर्ममन्त्राभिसप्त दूर्व्वाङ्कुरेन ताम्रभाजनस्थोमिश्रितदधिदुग्धघृतमधुखण्डरूपैः पञ्चामृतैः॥ दधि
दुग्धघृतगोमयमूत्रैः पञ्चगव्यैः॥ ॐ हूँत्रौँ ह्रीः अः बीजाधिष्ठितैः॥ ॐ आं जिं खं हूं मन्त्रेणाधितिष्ठेत्॥ पत्तुचित्रितपटपुस्तकमन्मयादिकं तस्य दर्पणे प्रतिविम्बरू
पः॥ मैत्रेयादिमन्त्राभिजप्तकलशवारिणा मङ्गलगाथा पठन् स्थापयेत्॥ मैत्रेयनाथ प्रमुखैर्वरबोधिसत्त्वैर्यत्कोर्त्तितं यदपि विहारविशुद्धसत्त्वैः॥ निःशेषदोष १११
नमिरापहरं जनानां तन्मङ्गलं भवतु ते परमाभिषेकः इति॥ ततः कांस्यभाजनस्थैर्न्यग्रोधउदुम्बरप्लक्षपिप्पलीगन्धमुण्डानां क्षीरवृक्षाणां वल्कलकल्कैर्विरुक्ष्या॥ ॐ
सर्व्वतथागतकायविशोधनिस्वाहेति मन्त्रेण॥ तथा ॐ हूँत्रौँ ह्रीः खं खं इति मन्त्राधिष्ठितकांस्यभाजनस्थसुगन्धतेलेन म्रक्षयित्वा विरुक्ष्य कांस्यभाजनस्थामलज्या

224 करुणात्मकं॥ शिष्यानामनुकम्पायैअस्माकं पूजनायच॥ तन्मे भक्तस्य भगवन् प्रसादं कर्तुमर्हसि॥ यथाहि सर्व्वसंवुद्धास्तुषिते संप्रतिष्ठिता॥ मायादेव्या यथा कुक्षौ तद्वतिष्ठ
दिहार्हतो॥ अत्रस्थ समन्तनाथ भूत्वा पुष्पादिकानमान्॥ गृहाणामुकस्यार्थाय बोधिचित्त प्रासदये॥ समन्वाहरन्तु मां वुद्धा जगत्त्वकर्कियाथेदा॥ फलस्था बोधिसत्वाश्च
याश्चान्या मन्त्रदेवता॥ देवता लोकपालाश्च भूता सम्बोधिशासिता॥ शासनाभिरताः सत्वाः ये केचिद्दत्रवस्तुना॥ अमुकोहं महाव ग्रप्रतिष्ठांविधिसंयुता॥ कारयिष्यामि ज
गदुद्धये पाशान्मुप्रचारनः॥ अनुकम्पामुपादाय सद्भिः सहितन्मम॥ एतस्मांसहिताः सर्व्वेसान्निध्यं कर्तुमर्हथति॥ एवं वारत्रयमिमं मन्त्रं संजप्त्वा मनमास्वादयत्॥ ततः इत्य ११२
कान्देवतानि मन्त्रणात्मानं प्रहर्षयेत्॥ ॥ अद्यमे सफलं जन्म सफलं जीवितञ्चमे॥ समः समयदेवानां भवितांहं न संशयः॥ अबेवत्मो भविष्यामि बोधिचित्तं क च
ता॥ तथागतकुलोत्पत्तिर्मम अद्य स्यान्न संशयः॥ अग्रो मे दिवसो ह्यद्य यज्ञो मे यनिरुत्तरः॥ सन्निपातो ह्येमेह्यत्र सर्व्वबुद्धानां मण्डलान्॥

225 ततः स्वादिदेवतयोगीक्रोधयोगीवायथोपदेशं भक्तादिकं विशोध्यदिक्पालेभ्योवलिमुत्सृजेत्॥ ततःकलशजलैरभिषिंच्य वज्ररक्षमन्त्राभिजप्तेन त्रिसूत्र ग्रन्थित्रयोपेतेन प्रतिसरेण
सव्यकरे वध्वा पर्युक्षितशिष्यं रक्षेत्॥ तत्त्वेनश्रावयेत्॥ यत्किंचिद्दत्तेन मन्त्री विधिपूजादिकं कुरु॥ अशोध्यनात्र कर्त्तव्यं महायज्ञफलावहमिति॥ ततो रक्षार्थं॥ ॐ वज्रसत्व हूं इति मन्त्रं
परिजप्य सुप्तादिनिसीमांतोपनयनं॥ ॥अथापरेऽहनि प्रभातसमये शान्तिकवलिं दत्वा प्रतिमादिकं तथैव स्थापितं॥ विहारादिकं पुनर्यथावस्थितं समयसत्वरूपं निष्पाद
येत्॥ पुस्तके त्वक्षरसमुदायस्तन्यताकलर रक्तपद्मसूर्ये रक्तह्रींकार रजाज्ञह्रीः परिणतामिताभरूपं परिणाम्याक्षरिसमयसत्वं विचिन्तयेत्॥ दीपङ्करस्य विहारादिकस्य च शून्य
तानन्तरं पद्मचन्द्रे शुभ्र भूंकारनाष्टारचक्रं भूं वैरोचनं परिणाम्य दीपङ्करविहारस्त्पो गन्धकूटीरूपो वा चैत्यरूपो वा समयसत्वं निष्पाद्य पाद्यार्घाचमनादि दानपुरःसरं
प्राग्वन्नीराजयेत्॥ ततोनन्तरोक्तविधिना पंचामृतादिम्रक्षणं॥ दिकं कृत्वा कुंकुमादिभिः समालभ्याक्षोभ्यस्य मंत्राधिष्ठितकलशजलैर्मङ्गलगाथा पठन्नभिषिंचये

227 किरणैः सर्वलोकधातुस्थानां सर्वसत्वानां दिव्यचक्षुर्विनियोजनमधिमुंचेदिति घृष्टितानं॥ ततः तुलाजादिपूर्णशंखभाजनेन नानारत्नविक्षेपेण च ॐ आः ह्रीं प्रवरसत्कारार्घं प्रतीच्छ
स्वाहेति मन्त्रेणार्घं दद्यात्॥ ॐ आः वज्रगन्धे हूं॥ इत्यनेन कर्पूरकस्तूरिकाकाश्मीरजादिभिर्गन्धैस्समालभ्य॥ ॐ आः वोध्यङ्गरत्नकवचस्त्रे स्वाहेत्यनेन मन्त्रेण पीतकंचुकेन प
रिधापेन मधिमुंच्या॥ ॐ आः दिव्यवासये हूं स्वाहेति मन्त्रेण पीतसमटिकां दत्वा॥ ॐ तिलकभूषणे हूं स्वाहेति मन्त्रेण चन्दनकुंकुमादितिलकं॥ ॐ आः सर्वतथागतमधुप्रासने हूं ह्र
स्वाहेति मन्त्रेण सौवर्णमध्वादिस्थमत्वस्थ पत्रोपरिघृतमधुसर्करा स्वतथागतशरीराप्यायनार्थं॥ ॐ सर्वतथागतचिंतामृतधारे स्वाहेति मन्त्रेण क्षीरं॥ सर्वाः पंचौषधीन्निरामय
र्थमेकयेत्॥ पञ्चभिरुपचारैः पूजयित्वा वज्रावेशसमयमुद्रां वध्वा सत्ताक्षरेण दृष्टिं कुर्यात्॥ इति जातकर्म्म॥ ॥ ततश्चाचार्यः॥ ॐ वज्रसत्व आः॥ इत्यनेन दर्पणं दर्शयित्वा
पूर्वोक्तमन्त्रेण गोरोचनादितिलकं दत्वा॥ स्वहृदिन्दौ विभावितवीजाक्षराणि यीतानि दैवतानामाक्षराणि प्रदीप्रोर्द्ध शिरसि कानि॥ ततः किरणैः परिपूर्णं सर्वबुद्धक्षेत्रं च विभाव्य॥ पुन

226 न्॥ यन्मङ्गलंकुलिशपाणि सवज्रराज श्रीवज्रराग वज्रसाधु सुसम्मितेन॥ अक्षोभ्यराजसुगतस्य महासुखस्य तन्मंगलं भवतु ते घवराभिषेकशनि॥ ततस्तवक्रमेणाभिषिंच्य शुचिसूक्ष्मवसने
स्निरुद्रकोष्णयहस्तेन प्रोक्षयेत्॥ ततः प्रतिमाया ललाटकण्ठहृत्सु चक्षुः कंठनासारसानासीमान्तनाभिषु च॥ ॐ आः हूं क्षिं त्रिं खं गं स्कं सप्तविवीजाक्षरैरधिनिष्ठेत्॥ ततो हेमसलाकया रूप्य
मल्लिकास्थितघृतमधुम्रक्षितया॥ अज्ञानपटलं वत्स अपनीतं मया तव॥ शलाकि केवे यराज्ये श्वयथालोकस्य नेमिरः॥ ॐ चक्षुरसमन्तचक्षुर्विशोधने स्वाहा॥ कज्जलाक्तेन॥
शतिपठन् प्रतिमायाश्चक्षुरुद्घाटयेत्॥ पुस्तकादिदेवतायास्तु दर्प्पणे भावित प्रतिविम्बायाः सव्यनरचक्षुषोमंकाराभ्यां रवीन्दुद्वयं॥ ॐ दिव्यचक्षुषे हूं॥ दीपेन॥ पुनः ॐ दि
व्यचक्षुषे हूं॥ सव्यचक्षुषि॥ ॐ धर्म्मचक्षुषे हूं॥ वामचक्षुषि॥ ॐ ज्ञानचक्षुषे हूं॥ दर्प्पणेन॥ पुनः ॐ ज्ञानचक्षुषे हूं॥ सव्ये॥ ॐ बुद्धचक्षुषे हूं॥ ॐ प्रज्ञाचक्षुषे हूं॥ वज्रेण॥ ११७
